UNIVERSAL LIBRARY
OU_184442
UNIVERSAL LIBRARY

दक्षिणभारतीग्रन्थमाला सं—३

महाकविकृता

# अवन्तिसुन्दरीकथा

केनचित्कृतः

# अवन्तिसुन्दरीकथासारश्च

से.-कृ.-रामनाथशास्त्रिणा

प्रकटितौ

1924

Title page printed at the Dixon Press, Madras.

Text portion printed at the Mangalodayam Press, Trichur.

# Introduction.

THE discovery of the two works included in this volume, though very fragmentary, will, I hope, surely contribute a few more facts to the history of the Sanskrit Literature and to the forgotten history of the Pallava Empire.

Of the two works *Avantisundari-katha* and *Avantisundari-kathasara*, the former is in prose with a poetic introduction and the latter is an easy summary of the former in verse. The prose work was written by Dandin and is acquired only as a broken fragment. It consists of a poetic introduction, the ancestry of the poet, the occasion for writing the work and the story itself—only a portion. The plot elaborated in the work is the same as what is summarised in the *Dasakumara-carita*. Avantisundari, the wife of Rajavahana, is the heroine of the story. The Kathasara as far as available to us is also incomplete and the story carries us to the first meeting of Rajavahana and Avantisundari and the narrative of Somadatta's adventure, i. e. nearly to the end of the *purvabhaga* (the first half) of Dasakumara-carita. The Kathasara was written generally in anustup metre in a terse and vigorous style which resembles the diction in Kavyadarsa of Dandin. Incomplete as it is, it consists of 800 verses and its authorship is at best a conjecture. The last verse of each sarga has an indicatory word *ananda*, as *Lakshmi* in Bharavi, *Sri* in Magha, *anuraga* in Pravarasena, etc. Bhoja says that *ananda*, is the

indicatory word of Pancasikha, the author of Sudrakakatha (शूद्रककथा).

The leaves containing the introductory portion in Avantisundarikatha are worm-eaten on both the ends, and the information has to be supplemented from the introduction in the Kathasara. These two works even as obtained, give us sufficient data for determining the date and place of Dandin and Bharavi and much valuable information about several great poets who lived before Dandin. The portion describing the occasion for the work throws much light on the development of the ancient architecture and its indebtedness to the Pallava kings of Kanci. The story proper as far as gathered from Kathasara unveils the history of Sudraka, Vararuci, etc., whose glories, in the imagination of poets, already attained a semi-mythological rank. Under these four heads we propose to take up the subject :—

(1) Dandin's ancestry, (2) occasion for writing the work, (3) early poets mentioned by Dandin, and (4) the story proper.

## I

Dandin after praising the Divine Triad, the Goddess Sarasvati and great poets, proceeds to the narration of his own ancestry. In the north-west India a family of Kausika-gotra Brahmins were living in Anandapura, which is now in Guzerat. Thence they migrated to Acalapura in Nasikya country (modern Ellichpur in the Central Provinces) in which Narayanasvami had a son Damodara or Bharavi. He made friends with the crown prince of the place called Visnuvardhana and accompanied him in a hunting excursion,

at the end of which he was obliged to save his life from starvation by eating flesh. He was ashamed to go back to his parents and became an exile. Durvinita, a Western Ganga prince, who was also an exile under the displeasure of his father, was attracted by the poetic talents of Bharavi and drew him over to his camp. The Ganga princes had matrimonial relations with the Pallavas and carried intense enmity with the Calukyas. Bharavi sent a verse in praise of Simhavisnu of Kanci, the great Pallava conqueror, who invited him to his court and treated him equal to his son, the great Mahendravikrama. Bharavi was twenty years old when he was entertained in the Pallava court. Durvinita, as we gather from the Ganga inscriptions, translated Brhatkatha into Sanskrit and commented upon Kiratarjuniya of Bharavi.

Durvinita and Simhavisnu were great ruling kings in about 580 A. D., and the movement of Bharavi from the camp of exiled Durvinita to the court of Simhavisnu would give him a probable date of 570 A. D. In the fragmentary lines of Bharavi's relations with Simhavishnu, a work called Gandhamadana as of Srivara is mentioned; the latter was one of the titles of the Pallavas. Gandhamadana seems to have been written by king Mahendravikrama.

................ साहसांकः स भूपतिः

सेव्यं सकललोकस्य विदधे गन्धमादनम् ॥

---

In the inscription of Mamandur, published in the South Indian Inscriptions Vol. IV, Mahendra is mentioned as an author of a number of dramas and patron of natya and sangita sastras. Celebrated Rudrata *alias* Rudra appears to have flourished in his court.

The narrative then goes on that Bharavi had a son Manoratha whose fourth son was Viradatta who married Gauri. To them was born Dandin, who even in his youth lost his father and mother and was instead fostered by Sruta (Learning) and Sarasvati. In the meantime Kanci was invested by the enemies, probably the Calukyas under Vikramaditya I. The siege continued for years and the enemies devastated the fair fields and gardens of the Cola and Pandya kingdoms. The citizens of Kanci deserted it in a helpless condition; Dandin was one among them. He had to travel all over India and in his long sojourns received instruction in various sastras in asramas or hermitages. When the storm of invasion subsided and the Pallava glory once more rose to its height, that is, in 10 or 12 years, Dandin returned home and recovered his lost estates. He maintained the literary prestige of his great ancestors in the Pallava court. Narasimhavarman and his son who carried their sword to the heart of the Calukyan capital, Vatapi, seem to be his patrons. Visnuvardhana, the crown prince of Acalapura who polluted Bharavi, appears to be Kubjavisnuvardhana, the conqueror of Vengi.

Dandin had as his friends several Nambudri Brahmins of Malabar and among them was the distinguished Matrdatta, a poet and scholar, the grandson of Devasvamin well learned in all the Vedas and the Vedangas. We know one Devasvamin as the commentator on the Asvalayana Srauta Sutras and Sankarsakanda in Mimamsa and Matrdatta as a commentator on the Hiranyakesiya Srauta Sutras. Whether these two scholars are the friends referred to by Dandin requires confirmation. His another friend was

Ramasarma, the son of the military commander of the Pallavas. Bhamaha mentions one Ramasarman.

## II.

Dandin was well learned in architecture of royal and divine structures. One day Lalitalaya, a great architect who surpassed the glories of even the Yavanas,* the son of Mandhatr whose genius in architecture highly pleased the great King Durjaya, probably the King Mahendra, came to Dandin and requested him to accompany him to Mahamallapura (modern Mahabalipura) to see his skill in the rejoining of the broken hand of the god's image. Dandin welcomed the proposal and went thither with his friends. The workmanship of the architect was perfect and no trace of the rejoining could be discerned even to this day. In the course of their admiration for the human skill a certain supernatural event took place which carries our imagination to the regions of mythology. While they were in the presence of god, whose feet were washed by the waves of the sea, a loose lotus flower was washed ashore and it touched the divine feet. Immediately it became a Vidyadhara, who stood before god with folded hands intercepted by a sword and bowed to him. In a minute he vanished into the air. The vision excited the curiosity of all. Ramasarman implored Dandin for its revelation. Our poet who

---

* Yavanas are referred to for their skill in ærial chariots in Budhasvamin's Brihatkathasarasangraha and in Baṇa's Harshacharita.

आकाशयन्त्राणि पुनर्यवनाः किल ज़ानते (V—198) Br

चण्डीपतिर्दण्डोपनतयवननिर्मितेन नभस्तलयायिना यन्त्रयानेनानीयत H. VI.

was equally puzzled promised to learn the mystery from the god himself. They returned to Kanci and on the next *Go-dvadasi* night he was lying on the kusa bed, the great god revealed to him the story of Avantisundari where a Vidyadhara must have been cursed into a lotus. Dandin related the story to his friends in the form of a literary work containing the stories of the great in the three worlds and the history of great kings of the past.

## III.

We shall next examine his poetic introduction. It opens with verses in praise of the Tri-murti, Sarasvati, Valmiki, and poets in general. Then Dandin bestows a single verse to the glorification of each of the great poets who lived before him. In the light of the recent research in literature and archaeology the mention of the poets appears to follow some strict chronological order. Subandhu hails first:—

सुबन्धुः किल निष्क्रान्तो बिन्दुसारस्य बन्धनात् ।
तस्यैव हृदयं बध्वा वत्सराज .... .... ....

It is said that he had his exit at the imprisonment of Bindusara and Vatsaraja possessing his heart did something—which portion is lost in the broken leaf. The mention of Vatsaraja reminds us of immortal Vasavadatta, the queen of Udayana, and the name Bindusara reminds us of a half verse quoted and commented upon in Vamana's Kavyalankarasutras. Bindusara was the son of Candragupta and Subandhu is said to hold the ministerial relation with the king. The available Vasavadatta of Subandhu has nothing to do with Udayana's mishaps and appears to be a later work as it contains references to the scholars of the

5th and the 6th centuries A. D. Abhinavagupta in his commentary on Bharata's Natya-Sastra, when commenting upon the word Natyayita—a series of dramas one in another, cites as an illustration the Vasavadatta-natyadhara of Subandhu which is evidently a chapter in his Vasavadatta which is mentioned as an akhyayika by Patanjali. In the citation referred to both Bindusara and Udayana are made audience as well as characters, in outer and inner plots in a regular series. Subandhu and Bindusara belong to about 280 B. C.

Next comes Gunadhya and then Muladeva as an author of a work where Devadatta and Narayanadatta are probably heroines. We know that Devadatta and her sister, Vipula are Muladeva's mistresses and Sasa was his amorus messenger dramatised in Padmaprabhrtaka of Sudraka. Muladeva was the author of Corasutras (aphorisms on the science of theft). His amours with Devadatta was described in Sringaramanjari of Bhoja.

Next comes a glorious figure who is still in the regions of mystery, i.e. Sudraka. The verse reads thus:—

शूद्रकेणासकृज्जित्वा स्वच्छया खड्गधारया ।
जगद्भूयोऽप्यवष्टब्धं वाचा स्वचरितार्थया ॥

Sudraka was a king of Ujjain and great poet. From Avantisundarikathasara where his life-sketch is given, he defeated Svati, an Andhrabhrtya prince, and carried away the royal maiden, Vinayavati and married her. Bandhudatta who frequently helped him in times of danger was at last committed to prison and then to gallows. Sudraka rescued him at the nick of the moment. As a poet, Mrcchakatika and

Padmaprabhrtaka are already known to be his dramas; Vatsarajacarita, now known as Vinavasavadatta has been ascribed to him by Vallabhadeva in his Subhasitavali as we find in the manuscript. In the verse of Dandin devoted to Sudraka the expression *vaca svacaritarthaya* tempts one to the minute examination of his works. As a result Mrcchakatika and Padmaprabhrtaka seem to relate the real incidents of his life. Sanghilaka, a Buddhist monk in Padmaprabhrtaka was one of the villains who was sent by Svati to murder Sudraka. Carudatta seems to be Bandhudatta, his intimate friend, and Sudraka himself Aryaka, who was asked to remember him in his other avocations.[1] In Vinavasavadatta the poet identifies himself with Udayana whose exploits bear strong resemblance with those of Sudraka. Svati whom he defeated appears to have ruled till 56 B. C. according to the Puranic genealogy which is generally confirmed by the latest epigraphic researches. Sudraka's reign seems to have commenced from 56 B. C. One is strongly tempted to identify him with the originator of the Vikrama Era. In literature also there are numerous references where the word Vikrama or its synonym Sahasa is usually applied to Sudraka. In Vinavasavadatta the epithet, Sahasalanchana* specially applied to Udayana may refer to himself if the author seeks identification with the hero. In Mrcchakatika also (Act VI)[2] there is a latent reference to Visamasila which is another name for Vikramaditya (*Vide* Visamasilalambaka in Kathasaritsagara).

---

* यस्तस्य युद्धे महति प्रवृत्ते पराक्रमः साहशलाञ्छनः सः।

1 चारुदत्तः-स्मर्तव्योऽस्मि कथान्तरेषु भवता।(Mrcchakatika Act VII-7.)

2 आर्यकः —भवेत् गोष्ठीयानं न च विषमशीलैरधिगतं —( Do. VI—4.)

After another poet whose name with Dandin's encomium is lost in the broken leaf, a full verse introduces us to great Bhasa.

सुविभक्तमुखाद्यङ्गैर्व्यक्तलक्षणवृत्तिभिः।
परेतोऽपि स्थितो भासः शरीरैरिव नाटकैः

From a large number of quotations and references Bhasa is known to be a profuse writer of dramas. But whether those which are recently published as his compositions are works of his or of different poets is still an open question. We shall speak of it elsewhere. Next to Bhasa is mentioned King Sarvasena, the author of Harivijaya, a Prakrit Kavya now extinct.

Next to him comes great Pravarasena, the author of Setubandha the well-known Prakrit work.

We know from Bharatacaritra* that a king of Kuntala composed Setubandha and from Bhoja's Srngaraprakasa that Kalidasa was sent by Vikramaditya as an ambassador to the court of a Kuntala king. The commentators on Setubandha ascribe it to Kalidasa. From evidences of this nature the author of Setu has to be identified with Pravarasena II, the king of Vakhatakas who, issuing from their original home of Acalapura, overthrew the Kadambas of Kuntala and extended prowess to the heart of Vidarbha country. Pravarasena is assigned to 420 A. D. Dandin's use of *nah* (our) perhaps refers to that sovereign's patronage extended to his forefathers at Acalapura.

---

* जडाशम्यान्तरगाधमार्गमलब्धरन्ध्रं गिरि चौर्यवृत्त्या
लोकेष्वलं कान्तमपूर्वसेतुं बबन्ध कीर्त्या सह कुन्तलेशः ॥

Then another poet is mentioned whose name or work is lost in the broken leaf. Then comes a full verse in praise of Kalidasa :—

The date of Kaldasa in spite of vigorus research is yet to be settled. From a number of literary references he appears to be a contemporary of a certain Vikramaditya, Pravarasena, Dinnaga and Kumaradasa. (Mallinatha and his predecessor Daksinavartanatha, attest to Dinnaga's disputations with Kalidasa). All these persons may be assigned to the first half of the fifth century A. D. Dandin's expression may mean that Kalidasa as an ambassador actually travelled over Vidarbha where Pravarasena encamped or that he travelled from his native place near Ramagiri in Vidarbha towards Ujjain.

The next poet mentioned leaves us only two words for any curious conjecture. They are चक्षुःक्षती (affliction in the eye). It may probably refer to Kumaradasa, who was born blind.

Then a full verse follows in praise of Narayana, who is undoubtedly the author of Venisamhara.

Out of three works attributed to him in the verse only one is available, and the others are still missing. He seems to have been a contemporary of Dharmakirti and Bana.

Then Dandin praises in very glorious terms some 'Emperor of poets.' The verse obtained is incomplete and may in all probability point to the celebrated Bharavi, his great-grandfather or Mahendra.

Then come Bana and Mayura in a single verse, who, we know from the words of Rajasekhara and Padmagupta (Navasahasankacarita II—18) flourished in the court of Harsavardhana.

He derides bad poets and there might be a pun on Karshnya and his opponent might be some Krishna Kavi. Manovati might be a queen.

## IV.

Next we come to the story itself. The plot is the same as in Dasakumaracarita which appears to be only the summary of the main plot in the Avantisundarikatha. For, several episodes, such as of Vararuci, Sudraka, Saunaka, Kadambari, Samudradatta, etc., make us believe that the work was written after the model of Brhatkatha. Vararuci is spoken of as Katyayani's son and a contemporary of King Mahapadma. Saunaka, the devout lover of Bandhumati, the heroine of a certain drama becomes Sudraka in the next birth and again was born as Kamapala in Avantisundari; Bandhumati too underwent transmigration as Vinayavati, the queen of Sudraka, and as Kantimati in her next birth in Avantisundari. The handmaid of Bandhumati was born as a wife of Sudraka in the name of Rangapataka and lastly became Taravali in this story. Thus an intimate connection is maintained in the form of rebirths between the heroes of the ancient world and the main characters of Dandin's story. In the narration of Kadambari's story Dandin is accurate to the end of Bana's portion of the work, but gave a free play to his own imagination in filling it up. For the plot differs a good deal from that supplemented by the son of Bana, Pulindabhatta.

Samudradatta is the hero of a drama called Puspabhushitaka, where Nandayanti, the daughter of a Vaisya was betrothed to Samudradatta who picks a

quarrel with Muladeva, vows to carry away his betrothed. Samudradatta marries Nandayanti secretly. But Muladeva kidnaps and marries her in the presence of the elders of the caste. Samudradatta as a kidnapper was sentenced to leave the country. She prepared herself for suicide. He meets her by accident and saves her.

Even in the main plot it is predicted that Rajavahana would have a brother Hamsavahana and that the former would conquer the three worlds and drive on a fiery chariot.

Apart from these differences the reader can discern some deeper meaning intended by the author in writing the work. He wanted to indentify his Pallava patrons with the great heroes of the Puranas and dramas as mere transmigration of souls. Several Ganga and Pallava kings bore the titles of Vikranta-Sudraka etc. One remarkable and unique name attracts our notice. Rangapataka, one of the wives of Narasimhavarman who is connected with the construction of the Kailasanatha temple at Kanci is the name of one of the wives of Sudraka.

Avantisundari in style resembles Kadambari but is less monotonous and more difficult. The strings of epithets are generally longer than in Kadambari but many a time present a finished picture worthy of a great poet. The loss of the work lamentably affects both history and literature

Avantisundari as an akhyayika has been mentioned by Vadighanghaladeva, an old commentator on Kavyadarsa and by an anonymous commentator on the same as well. The verse in praise of Vyasa is found

quoted under Dandin in Subhasitavali, a differen-work from that of Vallabhadeva.

Dandin is said to be the author of three celebrated works. One is Kavyadarsa, the next Avantisundari, and what is the third? We cannot for a moment entertain the theory of Dr. Pischel that Mrcchakatika is his third work. Bhojadeva comes to our rescue and mentions Dandin's Dvisandhanakavya and quotes a verse from it. The verse seems to possess a hidden allusion to great Harsavardhana.

उदात्तमहिमागम: प्रजानां हर्षवर्धन: ।

धर्मप्रभव इत्यासीत् ख्यातो भरतपूर्वज: ॥

The Great Jain teacher Sri Vardhadeva seems to have been a contemporary of Dandin, for in Sravanabelagola Inscription the following sloka occurs as Dandin's praise of Srivardha.

जह्नो: कन्यां जटाग्रेणबभार परमेश्वर: ।

श्रीवर्धदेव संधत्से जिह्वाग्रेण सरस्वतीम्

A number of akhyayikas like this have almost become extinct, to name a few, Trailokyasundari of Rudrata, Carumati of Vararuci, Malati, Sudrakakatha of Ramila and Somila, Keralavamsa, etc. We still hope that these and many more can be recovered if all the native states and corners of India which did not witness any terrible invasion are explored carefully.

The relation of Dasakumaracarita with Avantisundarikatha is still of curious nature. Both Katha and its sara are incomplete. Dasakumaracarita consists of two parts—purva and uttara bhagas and this division is not really appropriate to the order of the incidents of the story. Between the two, the uttara bhaga is in very good style while the former is stale.

An examination of a number of manuscripts of Dasakumaracarita reveals the following facts:— (1) most of them represent only uttarabhaga and the readings do not vary, (2) the purvabhaga differs in various copies and in some even the story is altered, Vide Tanjore Mss. Nos. 5266, 5267 & 5268.) (3) the oldest commentaries are found only on the uttarabhaga, (4) there is much similarity and sameness of expression between Avantikatha and the Utharabhaga. To add to these the following fact prompts us to theorise that a portion of Dandin's work was lost and the story was re-written as Purvabhaga finding materials from its translations or from oral story-telling.

Of the translations of Dasakumaracarita, the oldest is in Telgu by Ketana of about 1250 A. D. A comparision of his work with the original shows that the Purvabhaga corresponds exactly with the Telugu portion except that the story of Somadatta comes after the meeting of Rajavahana and Avantisundari but before their marriage and that Uttarabhaga is very much condensed in Telugu. Most of the idioms peculiar to Telugu are also crudely found in Sanskrit in the Purvabhaga. Ketana states that he was writing in chapters the story of Dasakumaras (ten young men) as related by Dandin in his prose work. These facts suggest whether the Purvabhaga was translated from Telugu putting Somadatta's story a little earlier in the Sanskrit rendering. Kanarase translation has quite a different story for this portion.

Thus we are tempted to say that the first portion of Avanti was lost and was re-written by several unknown writers. Perhaps the friends of Dandin might have taken copies to Malebar and the ghats have protected them from the ravages of time and poltical catastrophes.

Vadighanghaladeva may be identified with the Jain scholar, Munjarya, who bore that title, mentioned in a grant of Marasimha dated 963 A. D. His commentary on Kavyadarsa called Srutanupalini, is available only for two chapters, the second and the third. But an epitome of the same is found complete. He brings out clearly all the latent references to several verses whose significance is now forgotten.

References in Avantisundarikatha:—

Vegavati (page 3)—is a river near Kanchi.

Chitrayani (page 11)—might be the daughter of Katyayana and mother of Vararuchi.

Sudhira (page 21) might be some Chalukyan prince defeated by Harshavardhana.

**Mss. Material-** It is known to all that at the suggestion of late Professor, M. Rangachariar, formerly the Curator of the G. O. Mss Library, Government were pleased to sanction a peripatetic party to excute the search and acquisition of rare works in a systematic tour all over the Presidency. It worked for seven years under the able direction of Prof. S. Kuppusvami Sastriar, M. A., the present Curator of the Library. Among all the districts in which the party worked Malabar yielded the best results.

Nambudiri brahmans who possessed large collections of works assisted the party immensely and freely showed their literary treasures lending them to Government. The scholary world is really indebted very deeply to their frank loyalty.

Avantisundarikathasara was discovered in the Vadhyar manakkal near Kottakkal. The Ms. according to the superscript once belonged to the Tirunavaya Matha, where the great sage Krishnalilasuka, better known as Bilvamangala, flourished. We have shown elsewhere that the amorous tales told of him are mere myths and that he was a native of Malabar.

When the Sara was examined its vigourous style almost equal to that in Kavyadarsa prompted us to ascribe it to Dandin. A year hence a copy of Vallabhadeva's Subhashitavali was obtained in the Cherumukku Mana which contained a few worm-eaten leaves representing some prose work, which with the help of Sara was identified as Dandin's Avantisundarikatha. There were 15 leaves altogether 1 to 4 and 9 to 18 with a solitary leaf bearing the figure 87th. With hopes of getting the missing leaves I and Mr. Ramanatha Sastriar went to the same mana three times from Madras but in vain. At our request the senior Nambudiripadu kindly sent us a bag of loose leaves once committed to the lumber-room. Among them only 4 leaves pertaining to our work viz., 5 to 8, were found besides the seventh and eighth chapters of Brihati of Prabhakara.

Since the abolition of the aquiring and publication sections of the Library several of our friends advised us to publish these fragments in this series.

It is great misfortune to our ancient literature of India fostered by revered sages, whose sons we profess to be, to see under our very eyes that they perish in the palm leaves ravaged by worms and that the Department created to give succour ceased to exist. We have no further hopes of recovering complete copies of these works. Hence we have ventured to publish them even as fragments, so that the world may lament over the cruetly of Time and the exigencies of politics. The two sections, it was hoped, would have spared to the posterity the few remnants escaped from the great political cataclisms of the past which swept away our chief treasure which alone bestows upon India its individuality among the civilised nations.

M. RAMAKRISHNA KAVI.

। श्रीः ।

# अवन्तिसुन्दरीकथासारः ॥

वन्दे मन्दाकिनीवारिमकरन्दपरिप्लुतम् ।
सानन्दसुरनेत्रालि मुकुन्दपदपङ्कजम् ॥ १ ॥

नमः कन्दर्पदर्पघ्नज्वलज्ज्वलनचक्षुषे ।
लसद्गिरिसुतासक्तवपुषे चन्द्रमौलये ॥ ॥ २ ॥

मन्मुखे सुखविन्यस्तसविलासपदक्रमा ।
हंसीव विहरन्ती स्तात् सरसीव सरस्वती ॥ ॥ ३ ॥

जयत्यखिलसंलापरत्नराशिसमुद्भवः ।
भारतामृतसंभूतिः पाराशर्यपयोनिधिः ॥ ॥ ४ ॥

सद्गुणोदयसंक्षुण्णो दोषागमविजृम्भितः ।
अन्धकार इवाहन्ति कष्टं दृष्टिफलं खलः ॥ ॥ ५ ॥

विशुद्धिमत्पक्षपाताः श्रितनिर्मलमानसाः ।
हंसा इव मनः सन्तो हरन्ति मधुरैः स्वनैः ॥ ॥ ६ ॥

सन्तः सर्वहितार्थानां खलास्त्वखिलवैरिणः ।
तदुभावनुसृत्याव.........मतु श्रमः ॥ ॥ ७ ॥

मधुरोक्तिमणिश्रेणीगहनार्थमहाह्रदः ।
केनायमतिलंघ्येत गम्भीरः काव्यसागरः? ॥ ॥ ८ ॥

अवगच्छन्नयं शब्दान् कथञ्चिदपि पञ्चषान् ।
कवितामुत्सहे वोढुमहो मोहपरम्परा ॥ ॥ ९ ॥

सत्कथाकथनप्रीत्या तथापि कथयाम्यहम् ।
कान्तामवन्तिसुन्दर्याः कथामनतिविस्तराम् ॥ ॥ १० ॥

अस्तिप्रासादविस्तारग्रस्तव्योमान्तरा पुरी ।
काञ्चीपुराख्या कल्याणी कक्षु (भः) कुम्भजन्मनः ॥ ११ ॥

या भृत्यविगलद्भोगै रसंख्यवसुभिर्जनैः ।
भोगवत्यमरावत्यौ न्यक्कुर्वाणेव गर्विता ॥ ॥ १२ ॥

तस्यां जज्ञे बुधव्रातध्वस्ताखिलविपल्लवः ।
पल्लवेषु महीपालः सिंहविष्णुरिति श्रुतः ॥ ॥ १३ ॥

गरिम्णा स्थावरान् सर्वानोजसा जङ्गमानपि ।
यो विजिग्ये भुजश्लाघी भूभर्तृनुभयानपि ॥ ॥ १४ ॥

अदृष्टपूर्वो गन्धर्वस्तं सभासदमेकदा ।
उदञ्जलिर्महीपालमुपावीणयदार्यया ॥ ॥ १५ ॥

दनुजपतिहृदयभूधर-
विभेदविज्ञातशक्तिनखकुलिशम् ।
जगदुदयहेतु विष्णो-
रवतु वपुर्नारसिंहं वः ॥ ॥ १६ ॥

श्रुत्वैनामत्युदारार्थां कुतूहलखला (ली) कृतः ।
अब्रवीद्भद्र केनेयं निर्मिता वर्णपद्धतिः ॥ ॥ १७ ॥

इत्यूचिवांसं प्रत्यूचे गन्धर्वस्तं धने (रे) श्वरम् ।
देव स्वनुगृहीतोऽस्मि श्रूयतामवधानतः ॥ ॥ १८ ॥

अस्त्यानन्दपुरं नाम प्रदेशे पश्चिमोत्तरे ।
आर्यदेशशिखारत्नं तत्रासन् बहवो द्विजाः ॥ ॥ १९ ॥

ततोऽभिनिःसृता काचित् कौशिकब्रह्मसन्ततिः ।
ब्रह्मलोकादिवाक्रान्ती पुण्यतीर्था सरस्वती ॥ ॥ २० ॥

नासिक्यभूमावौत्सुक्यान्मूलदेवनिवेशिताम् ।
प्राप्याचलपु(रं नाम पु)रीमधिवसत्यसौ ॥ ॥ २१ ॥

तस्यां नारायणस्वामिनाम्नो नारायणोदरात् ।
दामोदर इति श्रीमानादिदेव इवाभवत् ॥ ॥ २२ ॥

स मेधावी कविर्विद्वान् भारविः प्रभ(वं)वो गिराम् ।
अनुरुध्याकरोन्मैत्रीं नरेन्द्रे विष्णुवर्धनी(ने) ॥ ॥ २३ ॥

क्षुधाविष्टेन तद्विद्धमामिषं मृगयान्तरे ।
अनिष्टशिष्टं हा! कष्टं तेनाभोज्यमभुज्यत ॥ ॥ २४ ॥

अगच्छन्नन्तिकं पित्रोः सन्नपस्तीर्थयात्रया ।
चरन् भेत्तर(?)मापेदे कस्यापि शुभजन्मनः ॥ ॥ २५ ॥

स दुर्विनीतनामासीदनन्वर्थाभिधानवान् ।
तस्यान्तिके वसत्येष तेनार्पयमुदीरिता ॥ ॥ २६ ॥

इति श्रुत्वा महीपालस्तदालोकनलोलुपः ।
अनेकश्रीमुखाकृष्टमकरोदमुमात्मसात् ॥ ॥ २७ ॥

स्वविशेषैरुर्विंगतैस्तमाचारैरतोषयत् ।
अभूषयच्च भूपालमग्राम्यैः स सुभाषितैः ॥ ॥ २८ ॥

नृपनिर्बन्धनिर्दिष्टे प्रकृष्टविभवे गृहे ।
वहतः पैतृकीं वृत्तिं तस्यासीत् तनयत्रयम् ॥ ॥ २९ ॥

मनोरथाह्वयस्तेषां मध्यमो वंशवर्धनः ।
ततस्तनूजाश्चत्वारः स्रष्टुर्वेदा इवाभवन् ॥ ॥ ३० ॥

श्रीवीरदत्त इत्येषामुत्तमस्तत्त्ववेदिनाम् ।
यवीयानस्य च श्लाघ्या गौरीनामाभवत् प्रिया ॥ ३१ ॥

ततः कथंचित् सा गौरी द्विजाधिपशिखामणेः ।
कुमारं दण्डिनामानं व्यक्तशक्तिमजीजनत् ॥ ॥ ३२ ॥

स बाल एव मात्रा च पित्रा चापि व्ययुज्यत ।
अयुज्यत गरीयस्या सरस्वत्या श्रुतेन च ॥ ॥ ३३ ॥

सविक्रिये पुरे तस्मिन् परचक्रोपरोधतः ।
स चचार शुभाचारः सर्वामुर्वीमुदारधीः ॥ ॥ ३४ ॥

अथाश्रमेष्वधीयानः शास्त्रेषु च कृतश्रमः ।
पश्यन् पुण्यान्यरण्यानि न्यवसद्दिवसान् बहून् ॥ ३५ ॥

अथाहूतः क्षितीशेन प्रशान्तोपद्रवे पुरे ।
स्वसुहृद्बन्धुमध्यस्थः स भेजे निजमास्पदम् ॥ ॥ ३६ ॥

एकदा वास्तुशास्त्रज्ञस्तक्षमर्मविचक्षणः ।
स्थपतिः कश्चिदभ्येत्य प्रणिपत्योपतस्थिवान् ॥ ३७ ॥

अनल्पकल्पिताश्चित्रा विकल्पाः शिल्पकर्मिणाम् ।
अत्र त्वष्ट्रामुनैवेत्थं तत्रस्थास्तमशंसिषुः ॥ ॥ ३८ ॥

स तु शिल्पिवरस्तेषामाक्षिप्य स्तुतिमात्मनः ।
मूर्धन्यञ्जलिमाबध्नन्नथ दण्डिनमभ्यधात् ॥ ॥ ३९ ॥

अस्ति विज्ञाप्यमस्माकमन्तर्ग्राह्योऽस्मि यद्यहम् ।
प्रार्थनां वितथीकर्तुं प्रभवो न भवादृशाः ॥ ॥ ४० ॥

महामल्लपुरे देवः स्वैरं वारिधिसन्निधौ ।
आस्ते मुकुन्दः सानन्दं फणीन्द्र इव मन्दिरे ॥ ॥ ४१ ॥

भग्नः केनापि तस्यासीत् कारणेनासुरद्विषः ।
मणिबन्धे महाबाहुः स मया सन्धितोऽधुना ॥ ॥ ४२ ॥

तदालोकितुमर्हन्ति भवन्तः साधु वा न वा ।
एतावता प्रयासेन प्रसादातिशयोऽस्तु नः ॥ ॥ ४३ ॥

श्रुत्वा सेनापतेः पुत्रः कलाकौशलपेशलः
पार्श्ववर्ती परां मैत्रीं बिभ्रद्दण्डिनमभ्यधात् ॥ ॥ ४४ ॥

आर्य संभाव्यतामस्य स्थपतेः प्रणयस्त्वया ।
अपि च स्पृहणीयं ते सुहृदामपि दर्शनम् ॥ ॥ ४५ ॥

मित्राणि मातृदत्ताद्याः केरलेभ्यो द्विजोत्तमाः
त्वद्दर्शनार्थमायातास्तस्मिन् सन्निदधत्यमी ॥ ॥ ४६ ॥

इति श्रुत्वा ततः प्रीतस्तं विसृज्यापरेऽहनि ।
सुहृद्भिः सह तं देशं ययौ तेन च शिल्पिना ॥ ॥ ४७ ॥

अथोत्तरङ्गभङ्गालीविलसद्बाहुलीलया ।
नृत्यन्तमिव गम्भीरमम्भोराशिं ददर्श सः ॥ ॥ ४८ ॥

ततः सागरकल्लोलक्षिप्तक्षोदाम्बुबिन्दुना ।
सेव्यमानं सुखामोदक्षारिणा वनवायुना ॥ ॥ ४९ ॥

तत्रोदारं मुदा पश्यन्नदूरे राजमन्दिरम् ।
गच्छन् वेलापथेनाथ प्रपेदे मन्दिरं हरेः ॥ ॥ ५० ॥

तरङ्गबाहुसंवाह्यचरणाम्बुरुहद्वयम् ।
उदन्वता मुदाविष्टो ददर्श मुरशासनम् ॥ ॥ ५१ ॥

प्रविश्य प्रतिमाभ्यर्णं गत्वा निर्वर्णयन्नयम् ।
नाध्यगच्छत् सुसंहत्या सन्धानं मणिबन्धके ॥ ॥ ५२ ॥

तस्यापहसितत्वष्टुस्तक्षकर्माणि शिक्षया ।
विस्मितोऽयं स्मितं कुर्वन्नर्घ्यैरर्चयति स्मतम् ॥ ॥ ५३ ॥

तस्मिन् काले जलोद्देशे ददृशे मुक्तवारिजम् ।
उदयारुणमार्तण्डमण्डलाकारि वारिधौ ॥ ॥ ५४ ॥

तत्तु प्रत्यक्षमेवैषां तरङ्गप्रेषितं हरेः ।
चरणाम्बुरुहस्पर्शात् सद्यो विद्याधरोऽभवत् ॥ ॥ ५५ ॥

ततः किरीटी केयूरी कृपाणी कवची च सः ।
भूत्वा तपस्वी भूतेशं प्रणम्योदपतद्दिवम् ॥ ॥ ५६ ॥

दृष्ट्वा दण्डिनमाचष्ट स्नेहादिष्टतमः सुहृत् ।
गौरीपुत्रोऽपि नन्वेतद्विस्पष्टं दृष्टवानिति ॥ ॥ ५७ ॥

पश्यन्नाश्चर्यरूपं तं चिन्तयित्वा किमित्यसौ ।
कौतुकाकृष्टदृष्टिभ्यस्तेभ्यः संभाव्यमभ्यधात् ॥ ॥ ५८ ॥

पद्मसंबन्धिनो नूनममुना मुनिशापतः ।
पक्षीभूय प्रमुक्तेन भाव्यं दिव्येन केन चित् ॥ ॥ ५९ ॥

अथ वा देवमाराध्य प्रसादान्मुरशासनम् ।
अत्याहितमिदं वेत्तुमत्यर्थमहमुत्सहे ॥ ॥ ६० ॥

ततः स्वभवनं गत्वा दर्भशय्यामुपेयुषे ।
कथयामास तत्सर्वं भूतार्थं भूतभावनः ॥ ॥ ६१ ॥

पृथुकान्तिमवन्तिसुन्दरीति
प्रथितां विक्रमरत्नराजहंसाम् ।
सरसां रहसि प्रियामिवार्द्रा-
मुपलेभे पुरुषोत्तमप्रसादात् ॥ ॥ ६२ ॥

मुक्त्वा शय्यां मिलितपुलकव्रातमुत्थाय भूयः
प्राप्तानन्दो विरतिसमये प्राक्तनीनां क्रियाणाम् ।
स प्रारेभे सपदि सकलां स्वप्नलब्धां सुहृद्भ्यः
शुश्रूषुभ्यः पृथुमथ कथां विस्तरेणाभिधातुम् ॥ ६३ ॥

इत्यवन्तिसुन्दरीकथासारे
प्रथमः परिच्छेदः ॥

# अथ द्वितीयः परिच्छेदः ॥

अथालोक्य स्थितान् सर्वान् कथाश्रवणकाङ्क्षया ।
रथाङ्गिणं प्रणम्यासौमिथस्तानभ्यभाषत ॥ ॥ १ ॥

अस्ति चेदीप्सितं श्रोतुं चेतः कौतुकशालि वः ।
अवधानात् कथामेनामाकर्णयत वर्णये ॥ ॥ २ ॥

आसन्नासन्नपुण्ड्रेक्षुश्रीमद्गोधूमशालयः ।
आधारः सर्वभूतानां मगधा नाम भूमयः ॥ ॥ ३ ॥

शुभ्रैरभ्रंकषैस्तत्र प्राकारागारगोपुरैः ।
रम्या पुण्यैरिवागण्यैः पुरी पुष्पपुरीत्यभूत् ॥ ॥ ४ ॥

विभ्रमाः सुदृशां यस्यां नव्येष (?) सरसामपि ।
अत्यागः प्रणयक्रोधे नहि दारेषु विस्मृतः ॥ ॥ ५ ॥

तस्यां राजा लघूकुर्वन् सर्वद्वीपोर्वराभरम् ।
राजहंस इति श्रीमान् राजराज इवाभवत् ॥ ॥ ६ ॥

यः प्रवृद्धप्रतापाग्नौ निर्दग्धद्विषदिन्धनः ।
तद्भस्मनेव त्रैलोक्यं व्यालिम्पद्यशसा भृशम् ॥ ॥ ७ ॥

सचिवेषु विनिक्षिप्य प्रमिति प्रेमवर्तिषु ।
अ...वा कापि भूभारं स भोगेषु धियं दधे ॥ ॥ ८ ॥

देवी वसुमतीत्यासीत् तस्यासुभ्योऽपि वल्लभा ।
उत्तमस्त्रीचरित्राणामुपदेष्ट्री स्वचेष्टितैः ॥ ॥ ९ ॥

तस्यामन्यासु च प्रीत्या ललितप्रेमकान्तिषु ॥
रममाणं क्रमेणैनमुपतस्थुरथर्तवः ॥ ॥ १० ॥

सहकारशिरःश्रोणीविकसन्मुकुलोज्ज्वलः ।
सगन्ध इव सामन्तो वसन्तस्तमसेवत ॥ ॥ ११ ॥

उदारे समये तस्मिन् हृद्यैरुद्यानगोचरैः ।
विहारैः सह रामाभिः स रेमे बहुविभ्रमैः ॥ ॥ १२ ॥

दैत्यराज्यमिवादीप्तशुचिशुक्रविरोचनम् ।
निदाघमनुभूयासौ जगाहे सरसीजलम् ॥ ॥ १३ ॥

विविधेनाम्बुवान्ये (द्य) न क्रीडया चेष्टमार्गया ।
मधुरैः करणैस्तस्मिन् स रेमे रमणीसखः ॥ ॥ १४ ॥

क्रीडान्ते स कृतस्नानः पूजितप्रियदैवतः ।
त्रयोदशविधैः सिद्धं संस्कारैः शोधनादिभिः ॥ ॥ १५ ॥

भुक्त्वा पञ्चविधं भोज्यमात्मसात्मोचितं ततः ।
भुक्त्वा (गत्वा) स्थानगतः शेषं निनाय ससुहृद्दिनम् ॥ १६ ॥

ततोऽतिरागिण्यर्के च प्रतीचीमुखचुम्बिनि ।
निशामपि विशालाक्षीविधेयहृदयोऽनयत् ॥ ॥ १७ ॥

ततस्तटिल्लताकल्पा स्फुटत्कुट च (ज) मालिनी ।
प्रावृट् प्रादुरभूत् तस्य मायूराराविणी पुरः ॥ ॥ १८ ॥

जडिमानं जलार्द्रस्य कदम्बमुकुलस्पृशः ।
निनाय वायोर्नारीणामुरोजकलशोष्मणा ॥ ॥ १९ ॥

ततः कुमुदकल्हारपद्मबन्धुनभस्वति ।
काले शुककुलालीढशालिशालिनि शारदे ॥ ॥ २० ॥

मणिहर्म्यतले रम्ये विशदप्रतिमेन्दुनि ।
पाययन् परमानन्दं प्रपेदे मदिरां प्रियाम् ॥ ॥ २१ ॥

अथाशेषाम्बुजद्वेषी विसारी हिमशीकरैः ।
प्रशान्तरविसन्तापो हेमन्तः समजृम्भत ॥ ॥ २२ ॥

हैमनेषु दिनेष्वेवं विस्मृतान्यविभूतिषु ।
रेमे रामाविधेयात्मा निशान्ते शान्तविश्रमः ॥ ॥ २३ ॥

अथैनमतिदुःस्पर्शस्पर्शनः शिशिरागमः ।
हेमन्तातिशयो वृद्धनीहारसुहृदाययौ ॥ २४ ॥

प्रबुद्धलोध्रवासन्तीकुन्दप्रसवरेणुभिः ।
चित्रयन् दयितावक्त्रं चिक्रीड शिशिरागमे ॥ २५ ॥

इत्थं यथर्तुव्यापारैरनुभूय प्रियामिव ।
ऋतुलक्ष्मीमपि क्ष्मापः प्रपेदे स परां मुदम् ॥ २६ ॥

ततस्तामपि तेजस्वी व्याजतः स्वप्रदोहदात् ।
अन्तर्वत्नीं वसुमतीं स शुश्राव सखीमुखात ॥ २७ ॥

नृपनिर्वर्तितानेकव्योमक्रीडादिदोहदा । ?
आसन्नप्रसवां वेलामाजगाम क्रमेण सा ॥ २८ ॥

ततः कतिपयामात्यप्रवृत्तानन्दमेकदा ।
भुक्तास्थानगमभ्येत्य प्रतिहारी व्यजिज्ञपत् ॥ २९ ॥

देव द्वारि स्थितः कोऽपि देवदर्शनदोहली ।
मस्करीति ततो राज्ञा(जा) प्रावेशयदनुज्ञया ॥ ३० ॥

गृहीतयोगसंभारनियमक्षामविग्रहम् ।
दृष्ट्वा मस्करिणं तस्मै वेत्रासनमदर्शयत् ॥ ३१ ॥

उपह्वरे सहामात्यैस्तदागमनकारणम् ।
अथापृच्छत् परिव्राजं राजा स च तमभ्यधात् ॥ ३२ ॥

विदितं नाम देवस्य यथाहं भवदाज्ञया ।
एवंलिङ्गी वसाम्येष मालवेषु तदीश्वरः ॥ ३३ ॥

मानसारो रणे मूर्ध्नि चरणाक्रमणेन ते ।
अमर्षादतिदुःसाधं तप्तुं व्यवसितस्तपः ॥ ३४ ॥

अवमानोऽणसन्तापादसहिष्णुश्चिरायितम् ।
अनासन्नफलात् तस्मान्निवृत्य तपसो हि सः ॥ ३५ ॥

महाकाले महामांसविक्रयेण महेश्वरम् ।
आराधयन्नसिवरं प्रापाप्रतिहतं क्वचित् ॥ ३६ ॥

तत्सहायात् सहास्माभिररिमिथालि युयुत्सया ।
इति श्रुत्वा परं देवः प्रमितिर्विरराम सः ॥ ३७ ॥

आकर्ण्य तदजय्यन्तमाकलय्य रिपुं नृपः ।
जीवितव्यय एवात्र श्रेयानित्यकरोन्मतिम् ॥ ३८ ॥

ततः सुमतिनामास्य मन्त्री वचनमब्रवीत् ।
देव मैवं कृथाः सन्तो न प्रशंसन्ति साहसम् ॥ ३९ ॥

शक्तिग्रहणहृप्ते तु शत्रावत्र द्वयी गतिः ।
तदाश्रयो वनं वेति निरपायो वनाश्रयः ॥ ४० ॥

देशे काले जयो वा स्यादात्मा सर्वात्मनापि च ।
रक्ष्य इत्येतमेवान्ये व्यवस्थ....न्यन्ति मन्त्रिणः ॥ ४१ ॥

तच्छ्रुत्वा सत्त्वसंपन्नः स्वच्छान्तःकरणान्नृपः ।
अतिगम्भीरमाचष्ट स्पष्टार्थमधुरं वचः ॥ ४२ ॥

असारः खलु संसारः शरीरमतिभंगुरम् ।
मरणेन रणे लभ्यमासंसारं स्थिरं यशः ॥ ४३ ॥

तदिमं भूतसङ्घातमुत्सृज्य रणमूर्धनि ।
यशोमयमिहाशासे दिवि तेजोमयं वपुः ॥ ४४ ॥

न च पश्चात्परैरेवं कृत्येष्वन्यत्र सन्ततेः ।
तत्रानुभाववान्देव्या गर्भ इत्यनुमीयते ॥ ४५ ॥

इत्थं निश्चलसङ्कल्पं जानन्नपि जनेश्वरम् ।
प्रणयेन पुनर्वाणीममात्यः प्रत्यभाषत ॥ ४६ ॥

देव जीवितमिच्छन्ति कातरा एव नेतरे ।
सारेतरश्च संसारः श्रेय एव यशो नृणाम् ॥ ४७ ॥

खलाभिलाषिणीं चेयं लक्ष्मीः क्षणचलाचिनी ।
पावृक्षतेव धत्ते न कंचिदप्यचलं पदम् ॥ ४८ ॥

अस्याश्चापलवार्तायां दृपिजालापि लज्जते ।
तदप्येनां वशे कर्तुं प्रभवन्ति महाशयाः ॥ ४९ ॥

बिसतन्तुनिविष्टोऽपि श्रियमाप शतक्रतुः ।
कलिध्वस्तोऽपि कालेन प्राप्तराज्यो हि नैषधः ॥ ५० ॥

अन्ये च खलु राजन्या विषमस्खलिनः श्रियम् ।
उपायैरधिगच्छन्तो बभूवुर्बहवो भुवि ॥ ५१ ॥

प्रतिपालय शैलान्ते कालं मा खलु साहसम् ।
इत्युक्त्वा चरणाभ्यर्णे स पपात कृताञ्जलिः ॥ ५२ ॥

अथैनमयमुत्थाप्य प्रथमप्रवणाशयः ।
नराधिप इदं कुर्वन्नुदात्ततरमब्रवीत् ॥ ५३ ॥

मरणं रमणीयं मे रणवर्जितजीवनात् ।
वने क्व नानुबध्नीयात् किममर्षपरो रिपुः ॥ ५४ ॥

भवद्भिस्तदिमां देवीमादाय सपरिच्छदाम् ।
दुर्गं विन्ध्यवनं गत्वा स्थातव्यं विगतव्यथैः ॥ ५५ ॥

रणयज्ञाङ्कणे प्राणान् परित्यक्ष्यामि दक्षिणाम् ।
अन्यथाहं विनङ्क्ष्यामि ज्वलदर्चिषि पावके ॥ ५६ ॥

इत्यनुत्तरमन्येषामत्युदारमुदीरयन् ।
सत्यसन्धो महीपालः प्रत्यपालयदाहवम् ॥ ५७ ॥

अनिवर्त्यममी कर्तुं व्यवसायमनिच्छया ।
कृच्छ्रादभ्युपगच्छन्तस्तामादाय वनं ययुः ॥ ५८ ॥

अथाश्चर्याण्यवर्तन्त घोररूपाणि सर्वतः ।
दुर्निमित्तानि भूकम्पप्रभृतीनि धरास्पृताम् ॥ ५९ ॥

तानि दृष्ट्वा विहृष्टेषु रणोत्सुकेषु राजसु ।
प्रहितो मालवेन्द्रेण ब्राह्मणः कोऽप्युपाययौ ॥ ६० ॥

अथानुरूपं भूभर्त्रा पूजितस्तदनुज्ञया ।
स्तुतिपूर्वं रिपोर्वाचं व्याजहारं वचो रहः ॥ ६१ ॥

मन्मुखेन महाभागमित्यूचे मालवेश्वरः ।
वीरप्रीत्यनुवृत्त्या त्वं युधिकस्नेहवानहम् ? ॥ ६२ ॥

अनन्यसुलभ....श्रीमद्विक्रमशालिने । ?
स्पृहयाम्याहवे नित्यं भुजविस्फूर्जितायते ॥ ६३ ॥

त्वद्विक्रमरसास्वादी चरणस्पर्शपांसुलान् ।
त्यक्त्वा प्राणान् रणे स्वैरं दिव्यस्त्रीभिरथारमे ॥ ६४ ॥

पुरा च परितप्तोऽस्मि प्रथनादपयानतः ।
तदद्य कृतसन्नाहावाहवायारभावहे ॥ ६५ ॥

इति श्रुत्वोर्जितां वाचं प्रत्यूचे मगधेश्वरः ।
बाढं ते...(ऽपि) प्रियं मे स्याद्युद्धार्थी यदि मालवः ॥ ६६ ॥

प्रन्धागभुवि(?) पुण्यायां प्रग एवास्तु सङ्गमः ।
अप्रशस्तमहो कामं वः परीक्षायियैषिणाम् ? ॥ ६७ ॥

तदद्यैव बलोद्योगः क्रियतामिति भूपतिः ।
बलाधिकृतमादिश्य प्रस्थाप्य च वचोहरम् ॥ ३८ ॥

ललितभ्रूलतोद्देशप्रोज्झिताखिलराजकः ।
ससंभ्रमजनात् तस्मादुत्थायाभ्यन्तरं ययौ ॥ ६९ ॥

तत्र चित्राणि रत्नानि बहुलानि वसूनि च ।
विविधानि च वासांसि विप्रसादकरोदसौ ॥ ७० ॥

ततो बहुविधाः शृण्वन् पुण्या विप्रजनाशिषः ।
कृतप्रास्थानिकः स्थानान्निर्जगाम जनेश्वरः ॥ ७१ ॥

प्रयाणे पटहध्वानक्षुभितस्थगितान्तरः ।
प्रलयार्णवसङ्काशः ससार बलसागरः ॥ ७२ ॥

तरङ्गितं तुरङ्गौघैर्विचित्रगतिविभ्रमैः ।
क्वचिदभ्रितमुद्भ्रान्तैः शैलोच्चयनिभैरिभैः ॥ ७३ ॥

रथनेमिप्रतिध्वानैर्मथनायितमन्यतः ।
बहुव्यालैः पदातीनां करवालैः करालितम् ॥ ७४ ॥

जगाहे जनसंबाधैरगाधं मगधेश्वरः ।
कटकं कैटभारातिर्वराह इव वारिधिम् ॥ ७५ ॥

अथानैषीदहःशेषं बलदर्शनलीलया ।
निशामपि नृपैः सार्धं कथया रणवत्सया ॥ ७६ ॥

प्रभाते कृतपुण्याहकलशस्नानमङ्गलः ।
स्तूयमानो ययौ योद्धुं मगधैर्मगधेश्वरः ॥ ७७ ॥

हेमकूटाख्यमारूढो हस्तिरत्नमनुत्तमम् ।
यत्सहायः स्वयं मेने जय्यमेव जगत्त्रयम् ॥ ७८ ॥

ततश्चतुर्विधैरङ्गैरुभयोरपि सेनयोः ।
अकालप्रलयाकारः स बभूव समागमः ॥ ७९ ॥

क्रमेण च रजोराशौ प्रशान्ते गगनस्पृशि ।
युयुधाते कृतस्पर्धौ मुहुर्मालवमागधौ ॥ ८० ॥

अतिभारतमत्युग्रमतिरामायणं रणम् ।
यद्बभूव तयोस्तस्मादूरेतारमयाद्य हि ? ॥ ८१ ॥

मालवेन्द्रगजे भग्ने हेमकूटेन तत्क्षणम् ।
वैरबद्धावयुध्येतां तुरगद्वयवर्तिनौ ॥ ८२ ॥

हते हयद्वये तस्मिन् निवर्त्य रथवर्तिनौ ।
उभावपि कृतोत्साहौ न तौ जेतुमशक्नुताम् ॥ ८३ ॥

मानसारस्ततो मानी चिन्तयन्नन्तकद्विषम् ।
तत्प्रसादाहृतं खड्गं चिक्षेप मगधेश्वरे ॥ ८४ ॥

तमेष लवशः कुर्वन्नपि शर्वप्रभावतः ।
प्रहृतो जगृहे कीर्त्या त्रैलोक्ये हृदि मूर्छया ॥ ८५ ॥

हृत्वा सूतं गते तस्मिन्नन्तर्धानमनन्तरम् ।
शत्रक्षत इवाम्भोधौ पपात च विरोचनः ॥ ८६ ॥

नृपचित्त इवात्युग्रे तमोराशौ तमीमुखे ।
हतसारथिमुद्भ्रान्ता विनिन्युस्तुरगा रथम् ॥ ८७ ॥

अतिलङ्घ्य बहून्देशान् कुहचिद्विन्ध्यगह्वरे ।
असह्यश्रमवैवश्या विजहुर्जीवितं हयाः ॥ ८८ ॥

लब्धसंज्ञः सुमत्यादीन् प्रत्यभिज्ञाय जल्पतः ।
आलापमशृणोदेषां गुल्मान्तरितमित्यसौ ॥ ८९ ॥

आर्याः शृणुत निक्षिप्ता राज्ञा सन्ततिरक्षणे ।
वयं सुतवरं देवी प्रासूत च सुलक्षणम् ॥ ९० ॥

तस्यैकादशमह्नाहः कृतमङ्गलसंज्ञिकम् ।
उपास्महे महाभागा वय......... ॥ ९१ ॥

सुप्ते च खेचरेणाहं नीयमानं कुमारकम् ।
दृष्टवानस्मि कष्टा च दुर्निमित्तपरम्परा ॥ ९२ ॥

इत्युक्तमात्रे तत्रासीद्भीतः केनापि बालकः ।
हंस....णपुंसोऽतिस्त्रैणाक्रन्दरवो महान् (?) ॥ ९३ ॥

हाहाकृतजने राज्ञी विलप्य बहु विह्वला ।
कुमारहरणोद्विग्नानमात्यानित्यभाषत ॥ ९४ ॥

साहं खलु महाराजशासनात् प्रसवावधि ।
आराधयितुमानीतास्म्यवन्ध्यां विन्ध्यवासिनीम् ॥ ९५ ॥

तत्र चैवमपुण्यायां नष्टः खलु कुमारकः ।
दुःखदग्धामिमं देहं त्यक्ष्यामि वनपावके ॥ ९६ ॥
आर्यपुत्राय नेतव्यो युष्माभिरयमञ्जलिः ।
इत्युदीरितसङ्कल्पां प्रत्यवोचत सुश्रुतः ॥ ९७ ॥
अविषह्यतमः शोको यदि सत्यमिदं भवेत् ।
तथालक्षणसम्पन्नः कथं नश्येत् स बालकः ॥ ९८ ॥
अमानुषतया छन्नोऽप्यात्मानं दुर्गयत्यसौ ।
अतो वै पश्चिमां बुद्धिं मा त्वं प्राकृतवत्कृथाः ॥ ९९ ॥
तथोक्ता निशि गाढायां निगूढव्यवसायिनी ।
यत्रास्ते नृपतिस्तस्मिन्नुद्बन्धनाधिया ययौ ॥ १०० ॥
स्त्रीभावादार्यपुत्रेति प्रलपन्तीं प्रियां नृपः ।
उपलक्ष्य स्फुटां वाचं मा साहसमिति व्यधात् ॥ १०१ ॥
श्रुत्वा पत्युरिवारावं दत्तदृष्टिः किमप्यसौ ।
दृष्ट्वा दीप इव व्यक्तं व्याजहार मुहुर्भिया ॥ १०२ ॥
ततो दीपप्रभाव्यक्तरुधिरोक्षितविग्रहम् ।
मृतकल्पमपश्यत्तं शयानं भूतले पतिम् ॥ १०३ ॥
लतेव चलिता भूमौ पपात पतिदर्शिनी ।
स तेषां द्विगुणीकुर्वन् पूर्वदुःखार्णवोऽभवत् ॥ १०४ ॥

प्राणत्यागप्रणयिनि जने मागधानामधीश-
स्त्यक्ताशेषव्यथ इव दृशावुन्मिमीलोल्लसन्त्या ।
नीत्वा राज्ञीं ज्वलनमुखतस्तूर्णमश्रूद्धधानां
प्राप्तानन्दाः प्रसभमथ ते सर्वे एवोपतस्थः ॥ १९५ ॥

इत्यवन्तिसुन्दरीकथासारे
द्वितीयः परिच्छेदः ॥

# अथ तृतीयः परिच्छेदः ॥

---

अथात्मनो यथावृत्तं निवेद्य स्वस्थवन्नृपः ।
प्रहर्षोपस्थितान् सर्वानमात्यानित्यभाषत ॥ १ ॥

देवीमरणपर्यन्तं भवद्वृत्तान्तमप्यहम् ।
जानाम्येवंगतः सोऽहं प्रत्याश्वस्तः पिनाकिना ॥ २ ॥

आविर्भूयात्रदेवः प्रसन्नः सन्नमानसम् ।
मनसैव कथं चिन्मां नमस्यन्तं पुरान्तकः ॥ ३ ॥

अहमेवासिरूपेण क्षिप्तः शकलितस्त्वया ।
अमानुषप्रभावत्वात् प्रीतः प्रत्यक्षमेयिवान् ॥ ४ ॥

नीतो नक्तंदिवेनाश्वैर्बह्वन्तरमिहैव च ।
मत्प्रभावेन भूयोऽपि प्रकृतिं च गमिष्यसि ॥ ५ ॥

अचिन्त्यबलसम्पन्नो जम्बुद्वीपैकनायकः ।
महानुभावः पुत्रस्ते भविता राजवाहनः ॥ ६ ॥

स पुनः षोडशे वर्षे दिग्जयाय विसृज्यताम् ।
इतरश्च कुमारश्च कुशली हंसवाहनः ॥ ७ ॥

न्यस्तशस्त्रेण कस्मिंश्चिद्वस्तव्यं च त्वयाश्रमे ।
इत्युक्तान्तर्गतो देवः प्रस्थितश्चास्मि निर्व्यथः ॥ ८ ॥

तच्छ्रुत्वा सर्व एवोचुः प्रसन्नस्ते पिनाकधृत् ।
वयं चानुगृहीताः स्मः प्रसन्ना विन्ध्यवासिनी ॥ ९ ॥

इत्यादि वदतामेव प्रभाता च विभावरी ।
शल्योद्धारक्रियां चक्रुस्तस्यायुर्वेदपारगाः ॥ १० ॥

विविधौषधसंपर्कविहितव्रणरोपणः ।
तपोवनं स तैः सार्धं प्रपेदे नर्मदातटे ॥ ११ ॥

न केवलं जलारण्ये प्रसन्नाः श्वापदा अपि ।
यत्रासन् मुनयो नैव तरवोऽप्यविपल्लवाः ॥ १२ ॥

निवारितपरीवारो विवेश विविशां पतिः ।
निर्मितं निर्मितत्वस्य विश्रमार्थमिवाश्रमम् ॥ १३ ॥

तत्र वेत्रासनासीनं मुनीन्द्रैः परिवारितम् ।
वामदेव इति ख्यातं तपोराशिं ददर्श सः ॥ १४ ॥

विनयेन नमस्यन्तं मुनिस्तं मुदिताशयः ।
समभिज्ञाय सर्वज्ञः सभार्यं पर्यपूजयत् ॥ १५ ॥

स्मयमानो मुनिस्तस्मै ततस्तमृषिपङ्क्तये ।
कथयामास शुश्रूषा यदि च श्रावयाम्यहम् ॥ १६ ॥

हिरण्मयाण्डप्रभवो जगद्योनिर्मुनिः पुरा ।
हरिनाभिसरोजन्मविहारी भगवानभूत ॥ १७ ॥

तस्मादत्रिरभूदत्रेः सोमः सोमाद् बुधो बुधात् ।
पुरूरवास्ततोऽप्यायुरायुषो नहुषोऽभवत् ॥ १८ ॥

ययातिरित्यतः पूरुः पूरोश्च जनमेजयः ।
ततः क्रमेण प्राचिन्वान् प्रवीराख्यमनस्यवः ॥ १९ ॥

अथाभवद्धुन्धम्लभव बहुविधः परः (?) ।
ततः शर्यात्यशम्पातिरुद्रुश्चाख्योग्रनेजसा (सः) ॥ २० ॥

अनन्तरं रन्तिनामस्तस्मादिलिल इत्यभूत् ।
इलिलादपि दुष्यन्तो भरतश्च ततोऽभवत् ॥ २१ ॥

ततो वितथ इत्यस्माद् भूमन्युरभवत् ततः ।
पृथक्क्षत्रस्ततो हस्ती तत्सूनोरजमीढतः ॥ २२ ॥

दक्षः संवरणस्तस्मात् कुरुः पश्चात् सुधन्वतः ।
सुधोत्रस्तत्सुतश्चैद्यः कृतकोऽथ बृहद्रथः ॥ २३ ॥

तत: कुशाग्रर्षभपुष्पवन्त:
सुधन्वदर्वाग्समतरावतेजाः (?) ।
सोमापिनामा सहदेवसूनुः
श्रुतश्रवानिरमित्र: क्रमेण (?) । २४ ॥

सुक्षेत्रनाम्नो निरमित्रपुत्राद्-
बभूव सूनुर्बृहदाद्यकर्मा ।
सेनाजिदित्यस्य रिपुंजयाख्यो
विभुः शुचिः क्षेम इति क्रमेण ॥ २५ ॥

ततः सुपुत्रस्त्वथ नेत्रनामा
नृपः सुपूर्वोऽप्यथ सुश्रुताख्यः ।
दृढाद्यसेनो नयनस्ततोऽभूत्
सुमत्यभिज्ञ: सुबलस्ततोऽपि ॥ २६ ॥

सुनेत्रत: सत्यजिदित्यमुष्मात्
स विश्वजित्तस्य रिपुञ्जयोऽभूत् ।
इत्येवमत्यद्भुतकीर्तिभाजः
सोमान्वये भूपतयो बभूवुः ॥ २७ ॥

दसववारतख्यातपोघोदहिनष सत्कीतिरक्रूरपपरयादेवं ववन्दे जलशायिनम् (?) ॥

कदाचिन्मुदितः स्वप्ने जगादैनं जनार्दनः ।
प्रीतोऽस्मि वत्स मामैवं तपसि व्यसनं कृथाः ॥ २८ ॥

सुतमुज्जयिनीभर्तुर्जेतारं जगतीपतिम् ।
आमदं कविमर्हेवी निर्विकारमवाप्नुहि ॥ २९ ॥

यस्य प्रद्युम्नसाम्बाभ्यामात्मजत्वं गमिष्यत: ।
इत्युक्त: स तथा चक्रे समीपे च तथाश्रमम् ॥ ३० ॥

स राजहंस इत्येनं दीर्घायुषमजीजनत् ।
चरितान्यतिमर्त्यानि यस्येति व्यरमन्मुनिः ॥ ३१ ॥

श्रुत्वैतद्विस्मयस्मेरः स्थित्वा किंचिन्नरेश्वरः ।
मध्याह्ननियमव्यग्रे मुनीन्द्रे शिबिरं ययौ ॥ ३२ ॥

मुनिप्रभावनिर्वृत्तां प्रतिगृह्यातिथिक्रियाम् ।
अन्येद्युः सपरीवारः प्रतस्थे पितुराश्रमम् ॥ ३३ ॥

ततोऽसौ प्रत्यहं गत्वा वामदेवमवन्दत ।
देवी परिचचारैनं गुणवत्पुत्रकांक्षिणी ॥ ३४ ॥

सवनेषु महर्षेश्च प्रतिपन्ना सदस्यताम् ।
ततस्तौ दम्पती तस्मिन्नूषतुः पितुराश्रमे ॥ ३५ ॥

राज्ञी पुनस्तपस्विन्या उपलभ्य गुहालयम् ।
अनपत्यजनाराध्यां प्रतस्थे तनयास्थया ॥ ३६ ॥

भित्तिचित्रगतं पित्रोः क्रीडन्तं पितुरन्तिकात् ।
दृष्ट्वा स्वतनयावस्थां प्रणयेन रुरोद सा ॥ ३७ ॥

तस्मिन्नेवान्तरे तत्र प्रपेदे शबराङ्गना ।
वयसा विंशतिप्राया पुंसा प्रवयसा सह ॥ ३८ ॥

विन्ध्यसेनेति तां देवी विदिता शबरस्त्रियम् ।
तमपि श्वशुरं तस्या व्यज्ञासीत् तापसीमुखात् ॥ ३९ ॥

शबराङ्गनया पृष्टा राज्ञी रोदनकारणम् ।
हंसापहृतावस्थाकथयामीति व्यथां ययौ (?) ॥ ४० ॥

तथैव तनयावस्थाकथया स्थितयोस्तयोः ।
कृतार्थीकृत्य तं देशं जगाम च जनेश्वरः ॥ ४१ ॥

संभ्रमागमनोत्थानप्रणामसमनन्तरम् ।
पार्श्वस्थां महिषी राज्ञे विन्ध्यसेनामतीदिशत् ॥ ४२ ॥

इयं हि नः सखी साध्वी निषादाधिपतेः प्रिया ।
तनयार्थमिहायाता श्वशुरेणामुना सह ॥ ४३ ॥

तं निशम्योपवेश्यैनामासीनस्तदनन्तरम् ।
वनेचरकरेऽपश्यन्महार्घमाणिकङ्कणम् ॥ ४४ ॥

ततस्तं पश्यतस्तस्य शबरस्याश्रुबिन्दवः ।
पेतुः किमिदमित्येनं पप्रच्छ पृथिवीपतिः ॥ ४५ ॥

ततः शबरवृद्धस्तं मौलिना भूतलस्पृशा ।
प्रणम्याभिदधे देव श्रूयतामश्रुकारणम् ॥ ४६ ॥

चण्डकृष्ण इति भ्राता धौरेयः क्रूरकर्मणाम् ।
ममासीत् तेन बन्धूनामहमेवावशेषितः ॥ ४७ ॥

तस्मिन् काले तपस्तप्तुं प्राप्तः केनापि हेतुना ।
रिपुञ्जयो महाभागस्तमहं वस [समशिश्रियम्] ॥ ४८ ॥

स सिद्धार्थश्चिरं स्थित्वा गच्छन्मुनिजनेच्छया ।
निहत्य भ्रातरं मामप्यरण्याधिपतिं व्यधात् ॥ ४९ ॥

अनुगच्छन्तमर्थैर्मामभिपूज्य व्यसर्जयत् ।
तत्प्रसादातिभारोऽयमनर्घं वलयं मम ॥ ५० ॥

तदा कृत्वा च देवस्य स्वरेण चरितेन च ।
तस्य स्मृत्वा निपेतुर्मे नृशंसस्याश्रुबिन्दवः ॥ ५१ ॥

इत्यादिपितृसंबन्धकथयाध्यास्य भूपतिः ।
विन्ध्यसेनां च विस्रब्धां विसृज्य स्वाश्रमं ययौ ॥ ५२ ॥

ततः पत्या सह व्याघ्रदमनाख्येन साधुना ।
विन्ध्यसेनामुपेतां तौ सत्कारैरभ्यनन्दताम् ॥ ५३ ॥

तौ मलिम्लुचदम्पत्यौ कालेन नृपदम्पती ।
बबन्धतुः परां मैत्रीं महार्हस्नेहनिश्चलाम् ॥ ५४ ॥

यामिन्याश्चरमे यामे स्वप्ने देवी कदाचन ।
बहुद्वीपार्णवाकीर्णं जगद्गोलं तु जग्रसे ॥ ५५ ॥

विदितस्त्र(?)प्रवृत्तान्तैरमात्यैः सह भूपतिः ।
प्रहर्षपरवानास्ते प्रशस्तापत्यसम्पदा ॥ ५६ ॥

अथाचिरेण रोचिष्णु मृगेन्द्रमिव केसरी ।
दधे वसुमती गर्भं दिनेशं द्यौरिवामला ॥ ५७ ॥

चक्रवर्त्यविसंवादि स्वप्रदौहृदघु(ल)क्षणा ।
विक्रमैकरसा दध्यौ गर्तवं जगताश्रयम् ॥ ५८ ॥

चतुर्णामप्यमात्यानां कलत्राणि पुरोधसः ।
गर्भं बभ्रुस्तदैवासीद्विन्ध्यसेनापि गर्भिणी ॥ ५९ ॥

सा सिंहदमनं नाम व्यसूत सुतमूर्जितम् ।
देव्यास्तु स्वसुतोत्पत्तौ प्रीतिः स्यान्नैव तादृशी ॥ ६० ॥

ततो वैजनने मासि प्रशस्ते महिषी दिने ।
असूत ग्रहवर्गे च स्वोच्चस्थानगते सुतम् ॥ ६१ ॥

प्रनृत्तनरनारीकः पुत्रजन्ममहोत्सवः ।
कण्ठपान्ति कृताशेषद्रव्यराशिरवर्धत (?) ॥ ६२ ॥

वामदेवोऽपि दृष्ट्वैनं दिव्याकारं कुमारकम् ।
मेने लक्षणसम्पन्नं चक्रवर्तिनमेव तम् ॥ ६३ ॥

विन्ध्यसेनाक्षिसानन्दमाकण्ठाद्विगुणोत्सवा ।
आदायात्मजमार्पेन्ते राजभर्तुर्दिदृक्षया (?) ॥ ६४ ॥

यथार्थया भविष्यन्त्या राजवाहनसंज्ञया ।
अलञ्चकार तं भूयः पुरोयायी पुरोधसाम् ॥ ६५ ॥

सुमतेः प्रमतिर्नाम सुश्रुतस्यापि विश्रुतः ।
मित्रगुप्तः सुमित्रस्य...............जः ॥ ६६ ॥

पुरोधसः सोमदत्त इत्यासन् पञ्च सूनवः ।
जननी विन्ध्यसेनायाः पुनरादाय दारकम् ॥ ६७ ॥

शबरेण सहोपेत्य प्रह्वा प्राह स्म भूपतिम् ।
.... .... ... .... ... .... ॥ ६८ ॥
कुमारानुचरस्तेऽसावनुरूप इवार्भक: ।
अत्यागमनमप्यस्माद्विज्ञेयमिति भूभुजा ॥ ६९ ॥
पृष्ट: शम्बरवृद्धस्तं प्रणनामाभ्यधत्त च ।
अटवीविन्ध्यसेनाया: कश्चिन्मातृष्वसु: पति: ॥ ७० ॥
नातिदूरे किरातेन्द्रस्तन्मातलमवेतस ।
ते वयं मैथिलं यान्तमाकर्ण्य वनवर्त्मना ॥ ७१ ॥
निरोद्धुं दत्तसङ्केता: प्रत्यधिष्ठाम शस्त्रिण: ।
प्रवृत्ते च तथा सार्धं किरातैराभिषेप्सुभि: ॥ ७२ ॥
भग्नप्राये बले राजा चिराय समयुध्यत ।
मां च कृत्वा किरातेन्द्र: सारसञ्चयरक्षणे ॥ ८३ ॥
लुप्तशोषेण सैन्येन प्रयान्तं नृपमभ्ययात् ।
निवृत्तस्त्वहमद्राक्षं विक्षताङ्गीमथाङ्गनाम् ॥ ८४ ॥
अब्रवीन्मामयं रक्ष्यो भर्तृदारक इत्यसौ ।
तदाकर्ण्य पतन्तं तं करिकर्णान्तरे शिशुम् ॥ ७५ ॥
आश्चर्यायुषमद्राक्षं ध्रुवादक्षतविग्रहम् ।
यमादायोपसृत्यैनां कासि भद्रे क यास्यसि ॥ ७६ ॥
कस्मात्सङ्क्रम्यते कस्मादित्युक्त्वा प्रत्युवाच माम ।
आयुश्या श्रुवि यातो विदेहाधिपतिर्नृप: ॥ ७७ ॥
प्रहारवर्मनामासौ यन्मित्रं मगधेश्वर: ।
देव्योरपि तथैवासीत्सौहृदय्यमथैकदा ॥ ७८ ॥
सह भर्त्रा सखीं द्रष्टुं सा देवी मगधान्ययौ ।
कालेऽस्मिन्मगधेन्द्रस्य मालवेनाहवोऽभवत् ॥ ७९ ॥

तत्र क्षत्रक्षयं कुर्वन् सार्धं चक्रे च नः प्रभुः ।
अत्रापरस्मिन्मध्यस्थो राज्ञा चम्पेश्वरेण च ॥ ८० ॥

साकमेकरथेनासौ मागधेनापवाहितः ।
स तु घोरं पराक्रामन् दिव्यास्त्रेणावघूर्णितः ॥ ८१ ॥

प्रत्यभिज्ञापि नाङ्गेषु मगधाधिपतेरभूत् ।
मालवेन्द्रः पुरो राज्ञां स एवव्याजपौरुषः ॥ ८२ ॥

भीतवान्नाहमित्युक्त्वा तत्याज निजमायुधम् ।
सुहृद्विरहविद्धोऽपि प्रव्रज्यातो निवर्तितः ॥ ८३ ॥

यमौ च जनयाञ्चक्रे तनयौ जनकेश्वरः ।
भद्रवाहनमादाय मालवादश्वमागतः ॥ ८४ ॥

ज्येष्ठपुत्रैरवष्टब्धान् विदेहानशृणोत्पथि ।
बलैकदेशमादातुं स्वस्रीत्वात् सुहृनाथतः ॥ ८५ ॥

अत्रक्रणे पथानेन क्रान्तः किं कुशली न वा ।
माता मे मन्दभाग्यायाः करे निक्षिप्य बालकम् ॥ ८६ ॥

मार्गे स्वयं कनीयांसं भर्तृमारकमग्रहीत् ।
योऽयमाधोरणे भग्नः प्रियो मे पार्श्वतो गतः ॥ ८७ ॥

कुमारस्तं गजं दृष्ट्वा रुरोदारोहणेच्छया ।
अज्ञानादहमप्येनमारोहितवती शिशुम् ॥ ८८ ॥

सार्थभङ्गे हते तस्मिन् परिभ्रश्यापतद्भुवि ।
सोऽयं दीर्घायुरेषाहमेवं मुक्तास्मि विह्वला ॥ ८९ ॥

ततः स्निग्धं गृहीत्वैनं प्रत्यहं परिषस्वजे ।
सेनापतिश्च तं हत्वा निवृत्तः प्रेक्ष्य दारकम् ॥ ९० ॥

मत्करे विन्ध्यसेनायै सार्धं प्रेषितवानिति ।
श्रुत्वा तौ दम्पती भग्नो विदेह इति मूर्च्छितः ॥ ९१ ॥

आकुलेन किरातेन यथावत्कथितं पुनः ।
अनामयं नृपस्येति श्रुत्वा स्वस्थः कुमारकम् ॥ ९२ ॥
चित्तापहारं भूपस्तमपहाराभिधं व्यधात् ।
ततोऽन्यं तत्समाकारं कृत्वा हस्ते कुमारकम् ॥ ९३ ॥
प्रज्ञातो मुनिरभ्येत्य प्राप्तातिथ्यः समभ्यधात् ।
तीर्थयात्रागतः सोऽहं भागीरथ्यामथाप्लुतः ॥ ९४ ॥
अकिञ्चनत्वान्निःशङ्कं न्यवर्ते वनवर्त्मना ।
तत्रारण्ये बहुव्यालं विरलव्याकुलप्रजम् ॥ ९५ ॥
मध्याह्ने गमनश्रान्तः कमपि ग्राममभ्यगाम् ।
तत्रोन्मत्त इवाकृत्या चैत्यवृक्षतले स्थितम् ॥ ९६ ॥
कण्डूखर्जितसर्वाङ्गं वृद्धग्रामीणमैक्षिषि ।
तस्मादशृणवं ग्रामं मरकक्षीणमानुषम् ॥ ९७ ॥
यद्यदुक्तं जनैस्तत्तत्कुर्वाणमघशान्तये ।
ततः किञ्चिदतिक्रामन्नदूरे जरतीं स्त्रियम् ॥ ९८ ॥
अद्राक्षं तत्क्षणक्रोदक्षुरिकक्षतयोजितम् ।
कासि भद्रे किमित्येनामप्राक्षं भृशमक्षमाम् ॥ ९९ ॥
सापि मद्गौरवाक्षिप्तक्षतोपद्रवमब्रवीत् ।
भद्र संक्षेपतो वक्ष्ये विदेहाधिपतिर्वने ॥ १०० ॥
कस्यापि हेतोः प्रस्थाता संरुद्धः प्रतिलोमके ।
सार्थभङ्गे परिभ्रष्टा कान्दिशीका दिवानिशम् ॥ १०१ ॥
शिशुना च करस्थेन क्रन्दन्ती वनमभ्रमम् ।
अटव्यामटनश्रान्ता शार्दूलेनास्मि विक्षता ॥ १०२ ॥
करभ्रष्टं कुमारं च प्रहर्तुमयमुद्यतः ॥
तत्रैव शबरान्यस्त धेनुकाशवसंनिधौ ॥ १०३ ॥

बाणयन्त्रं मृगान् हन्तुं तदनेनावघट्टितम् ।
यन्त्रमुक्तेन बाणेन प्रहतः पतितो मृगः ॥ १०४ ॥

अपजह्रुः किरातास्तं किशोरं द्वीपिना सह ।
मृत्युहस्तादयं रक्ष्यो भवता भर्तृदारकः ॥ १०५ ॥

ज्यायानप्यस्य मत्पुत्रीकरे त्रिसुतरेत्यसौ । (?)
इत्याकर्ण्य ततस्तूर्णं गच्छन् प्रच्छन्नमान्तिकात् ॥ १०६ ॥

कुमारवधगृध्नूनां तेषामशृणवं गिरम् ।
भिद्यतां शिशुरस्त्रौघैर्मज्ज्यतां वा महाह्रदे ॥ १०७ ॥

अथवा शस्त्रकृत्ताङ्गं क्षिप्यतां चण्डिकागृहे ।
इत्थं जल्पत एवामूनभ्येत्य द्रुतमभ्यधाम ॥ १०८ ॥

शिशोरस्य वधे कल्पं जानामि स्फुटमित्यहम् ।
ततः कुतूहलाविष्टैः पृष्टस्तानहमब्रवम् ॥ १०९ ॥

गुणवानुपहारोऽयं तस्मादुपादिशामि वः ।
अक्षतस्वस्थसर्वाङ्गं भूषयित्वा कुमारकम् ॥ ११० ॥

यतध्वं विन्ध्यवासिन्यै दातुं मरकशान्तये ।
हतं पापं प्रसन्नास्मीत्युक्ते प्रत्यक्षया तया ॥ १११ ॥

अपृष्टालोकिनस्तावद्दत्त्वैवं गम्यतामिति ।
अथाहं निर्गते तस्मिन्निषण्णश्चण्डिकागृहे ॥ ११२ ॥

निशीथे शिशुमादाय प्राप्तं व्याधमलक्षयम् ।
स सर्वं पूर्वनिर्दिष्टं निर्विचारमचेष्टत ॥ ११३ ॥

देवतेव गृहीत्वैनं प्रागुक्तां गिरमब्रवम् ।
गते तस्मिन्निवृत्तस्ते प्रजापालाय बालकम् ॥ ११४ ॥

अर्पयित्वा यथाकामं गमिष्यामीत्युपस्थितः ।
इत्याकर्ण्याब्रवीद्राजा विचित्रा विधिवृत्तयः ॥ ११५ ॥

अहो खल्वप्रतर्क्योऽयं पुत्रयोर्मे समागमः ।
कथं नु रत्नोद्भवकामपालयो-
र्वयस्ययोस्तस्य च सत्यशर्मणः ।
शृणोमि वार्तामपि षुत्रकाविमौ
समानयन् किं न करोति मे विधिः ॥ ११६ ॥

इत्यादिष्टे नृपेण प्रियतम त इमे नामतोऽप्यश्रुता मे
मैत्रीपात्रं...... वा किमिति वसुमतीवाक्यमाकर्ण्य भूयः ।
आनन्दार्द्रेण राज्ञा त्वमसि परवती देवि शुश्रूषया चेत्
प्रख्यातं प्रारभे त्वद्गुरुजनचरितं वक्तुमित्याबभाषे ॥ ११७ ॥

इत्यवन्तिसुन्दरीकथासारे
तृतीयः परिच्छेदः ॥

# चतुर्थः परिच्छेदः ।

अथोपचक्रमे वक्तुं विचित्रं मित्रवत्सलः ।
गुरूणां चरितं देव्या चिराभिलषितं नृपः ॥ १ ॥

पितुर्मे धर्मसाचिव्यं कुर्वाणाः सुहृदोऽभवन् ।
मतिशर्मा धर्मपालः पद्मोद्भव इति त्रयः ॥ २ ॥

प्रथमौ कथितौ तेषामग्रण्यावग्रजन्मनाम् ।
तृतीयस्तु वणिग्वंशस्तस्य विस्तारिणी कथा ॥ ३ ॥

वैवस्वतो मनुश्चासौ तस्येक्ष्वाकुरभूत्सुतः ।
कनिष्ठः किल तस्यासीन्नाभागोऽरिष्ट इत्यपि ॥ ४ ॥

तस्माद्बालन्दनो नाम वणिक्पतिरजायत ।
बालन्दनानुजन्मान्यः ख्यातः पोतप इत्यभूत् ॥ ५ ॥

तं कदाचन चाणक्यनीत्या नन्दपदे स्थितः ।
चन्द्रगुप्तो महामूल्यां मुक्तावालिमयाचत ॥ ६ ॥

तथेति स पुनर्गेहं गच्छन्नातपमूर्छितः ।
कयाचित्स्वगृहान्नीत्वा प्राणितः पुरयोषिता ॥ ७ ॥

तेन प्राणोपकारिण्यै दत्ता मुक्तावली च सा ।
ततो राजकुलं वेश्या विवेश तदलंकृता ॥ ८ ॥

इत्यभिज्ञाय तां राजा तमाहूय च पोतपम् ।
चोदयामास राजार्हां दर्शयैकावलीमिति ॥ ९ ॥

सोऽब्रवीत्प्राणदायिन्यै प्रीतिदायः कृतो मया ।
सन्त्यन्यानि च रत्नानि स्वेच्छं तद् गृह्यतामिति ॥ १० ॥

ततः क्रुद्धाय सावज्ञं व्यज्ञापयत पोतपः ।
दत्तासंकीर्तनं धर्मस्तथापि कथयामि ते ॥ ११ ॥

अंबुराशौ पुरा भ्राम्यन्नद्राक्षं पुरुषं क्वचित् ।
पाशबद्धं विपाश्यैनं शोकहेतुं च पृष्टवान् ॥ १२ ॥

दुर्विधित्वमिति श्रुत्वा सर्वस्वं तस्य दत्तवान् ।
पत्तनानि चरन्भूयो वित्तानि भृशमार्जयन् ॥ १३ ॥

तथान्यानि च दत्तानि नैका मुक्तावली मया ।
इत्युक्ते सपुमानस्मीत्यभ्यधायि महीभृता ॥ १४ ॥

ततः प्रीतेन भूभर्त्रा विसृष्टः पुत्रलिप्सया ।
विप्रसात्कृतसर्वस्वश्चकार तपसे धृतिम् ॥ १५ ॥

अभ्येत्य ब्राह्मणच्छद्मा गुह्यकस्तमुपह्वरे ।
धनाधिपतिसंदिष्टं निर्देष्टुमुपचक्रमे ॥ १६ ॥

अथ खल्ववनीभर्ता तपस्यति रिपुंजयः ।
तस्मिन्काले विशालायां वीतिहोत्रादनन्तरम् ॥ १७ ॥

प्रद्योतादिष्वतीतेषु क्रमेण नृपतिष्वभूत् ।
महानन्दीति तद्राज्ये महानृत्तमवर्तत ॥ १८ ॥

प्रेक्षकौ मानुषाकारौ शंखपद्मनिधी च तत् ।
पद्मस्तयोर्निरुद्धोभूत्केनाचिन्मन्त्रवादिना ॥ १९ ॥

अथ रुद्धो विसृष्टः स प्रत्याहर्तुं च तद्वसु ।
महापद्म इति ख्यातः पुत्रोऽभूत्तस्य भूपतेः ॥ २० ॥

स संजहार सर्वस्यां वित्तराशिमशेषतः ।
पृथिव्यां पृथिवीपालस्तास्मिन् काले द्विजोत्तमः ॥ २१ ॥

आसत्किलापिनामास्य कन्या कात्यायिनीत्यभूत् ।
अन्तर्वत्नी च सा कन्या जाता वैतानवह्निना ॥ २२ ॥

त्यक्ता दुष्टेति सा पित्रा साक्षाद्भूय हविर्भुजा ।
नीता गोदावरीं तत्र प्राप्ता वररुचिं सुतम् ॥ २३ ॥

पञ्चवर्षे वररुचौ तद्गृहं जग्मतुर्द्विजौ ।
एकस्तयोरभूद् व्यालिरिन्द्रदत्तस्ततोऽपरः ॥ २४ ॥

तयोर्विश्रान्तयोस्तास्मिन् नृत्तं दृष्ट्वा विलंबितम् ।
प्रदोषे गतभूयिष्ठे ययौ वररुचिर्गृहम् ॥ २५ ॥

ततः कुपितया मात्रा प्रयोगायाभिचोदितः ।
सर्वमेव यथादृष्टं दर्शयामास चेष्टया ॥ २६ ॥

दृष्ट्वैतद्विस्मितो व्यालिस्तन्मातरमभाषत ।
भद्रे भानोरहं सूनुर्व्याळिर्नाम द्विजन्मनः ॥ २७ ॥

लालयन्नेकपुत्रं मां नैवाध्यापितवात् पिता ।
अकृतद्विजसंस्कारं परिपालयतिस्म माम् ॥ २८ ॥

एकदा दयितापादरज्जुना व्यापृते मयि ।
भिक्षार्थी तत्र मद्भार्यां दृष्ट्वास्मयत मस्करी ॥ २९ ॥

ततस्तस्मै स्मितं कृत्वा भिक्षां दत्तवती च सा ।
मया किमिति निर्बद्धा स्मितहेतुमवोचत ॥ ३० ॥

मूषिकाहं महाभाग नामना चास्मि पण्डिता ।
जातः साकं गता भक्त्या छन्नमेवैनमन्वयाम् (?) ॥ ३१ ॥

तत्र श्येनगृहीताहं तन्मुखाज्जाह्नवीजले ।
पतन्ती तीर्थमरणात् प्रपन्ना जातिमुत्तमाम् ॥ ३२ ॥

दृष्ट्वैतद्भर्तृवाल्लभ्यं तत्सर्वं स्मरतो मुनेः ।
अजनि स्मितमित्युक्त्वा संतस्थे किमपि प्रिया ॥ ३३ ॥

क्रन्दतो मे मुनिर्मोहं निनीषुं मामशाश्वसत् ।
प्रव्रज्यां ग्राहितस्तस्माद्योगविद्यामशिक्षयम् ॥ ३४ ॥

अशास्त्रज्ञतया भूपपरिव्राजकसंनिधौ ।
निन्दितो मूढयोगीति सोऽसिधारामधारयत् ॥ ३५ ॥

आदिष्टश्च कुमारेण लब्ध्वा श्रुतधरं ततः ।
उपवर्षं भजस्वेति सोऽयमासादितोऽधुना ॥ ३६ ॥

इत्युक्तः सोऽभ्यधत्तान्य इन्द्रदत्तोऽस्मि नामतः ।
गुरोर्गोपालकस्याहं शिष्यः कांपिल्यदेशजः ॥ ३७ ॥

विरूपेति विरुद्धाख्या कन्यासीत्तस्य तां पुनः ।
सर्वविद्यापनेर्दातुं स संकल्पितवान् पिता ॥ ३८ ॥

तस्या मम च संजज्ञे गाढं प्रेम परस्परम् ।
अनन्योपायलभ्यत्वाद्विद्योपायमचिन्तयम् ॥ ३९ ॥

ततः स्वामिगृहं गत्वा सुब्रह्मण्यमतोपयम् ।
आज्ञप्तस्त्वेवमेवाहं देवेन पुनरागतः ॥ ४० ॥

विद्याध्ययनभागी च भविष्यत्ययमर्भकः ।
एकसन्धः स नो हस्ते तद्भद्रे दीयतां सुतः ॥ ४१ ॥
इत्युक्त्वा वह्निनाप्येतद्बोधिता पूर्वमेव सा ।
रुदन्ती पुत्रवात्सल्यात् कथमप्यभ्युपागमत् ॥ ४२ ॥
कृतोपनयनं चैनमादाय मुदिताशयौ ।
उपवर्षगृहाभ्याशं प्रतस्थाते द्विजोत्तमौ ॥ ४३ ॥
तेनापि कश्चिदर्थीति विस्मिताज्जनतामुखात् ।
उपवर्षगृहं श्रुत्वा जग्मुर्वर्षगृहान्तिके ॥ ४४ ॥
उपाध्यायः क्वेति पृष्ट्वा तत्सती रुष्टमानसा ।
अलं मा परिहस्येति पर्यश्रुनयनाभवत् ॥ ४५ ॥
ततः क्षेत्रादुपावृत्तस्कन्धन्यस्तहलादिकः ।
उपवर्षः स तान् दृष्ट्वा विश्रान्तः पुनरब्रवीत् ॥ ४६ ॥
कतमः श्रुतधारीति तौ कात्यायनमूचतुः ।
प्रहर्षन्नुपवर्षस्तान् विविक्त इदमब्रवीत् ॥ ४७ ॥
अस्मिन् वर्षोपवर्षाख्यावभूतां सहजौ द्विजौ ।
वर्षस्तयोर्महाविद्वानुपवर्षः कृषीवलः ॥ ४८ ॥
माब्रुवन्मूर्खजायेति ज्येष्ठभार्या कदाचन । (?)
मूर्खाय कशिपुं दत्वा धार्यं व्रतमधारयत् ॥ ४९ ॥
मूर्खोचितमसौ गृह्णन्नुपवर्षः स्वभार्यया ।
कदर्थितो रुदित्वाथ व्रीळात्स्वामिगृहं ययौ ॥ ५० ॥
तत्र प्रियंगुगुप्तासौ हव्यशेषजिघित्सया ।
वृषजग्धे पुनश्चैवं यावत्पारमुपावसत् ॥ ५१ ॥
ततः प्रसन्नः सेनानी प्रत्यक्षीभूतवानयम् ।
तष्ट्वा टङ्केन तज्जिह्वां किमपि क्षिप्तवान्मुखे ॥ ५२ ॥

एकसन्धादृते नैतां विद्यामध्यापयेति तम् ।
अभिधाय गतो देवः सोऽहं तदभिधीयताम् ॥ ५३ ॥

इत्युक्तास्तेऽभिवन्द्यैनमध्यगीषत वाङ्मयम् ।
सकृत्कात्यायनः श्रुत्वा द्विर्व्याडिस्त्रिरथापरः ॥ ५४ ॥

ते तु निर्वर्तितस्वार्थाः गुर्वर्थं दक्षिणार्थिनः ।
महापद्ममुपेत्याथ प्रार्थयन्नर्थमीहितम् ॥ ५५ ॥

तस्मिन् काले स कन्यां स्वां संहृताशेषहाटकः ।
यो मे हेमलवं दद्यात्तस्मै देयेत्यतिष्ठिपत् ॥ ५६ ॥

ततः कणिकया हेम्नः कन्यां कश्चिदयाचत ।
कुतो लब्धमिति क्ष्मापः तमप्राक्षीत्स चाब्रवीत् ॥ ५७ ॥

मयैतत्कन्यकालोभान्निःस्सुवर्णतया भुवः ।
श्मशानलब्धमित्युक्ते हर्षादौज्झदसावसून् ॥ ५८ ॥

व्याडिशिक्षितयोगस्तमिन्द्रदत्तः कळेबरम् ।
प्रविश्याभून्नृपो भूत्वा कात्यायनमतर्पयत् ॥ ५९ ॥

अमात्येनार्यकाख्येन स्वदेहे वह्निसात्कृते ।
इन्द्रदत्तेन राज्ञेव नन्दिराज्यमभुज्यत ॥ ६० ॥

विरूपाथ च तत् ज्ञात्वा यक्षीभूयान्वभूयत ।
इतरावपि गुर्वर्थं कृत्वा स्वैरमगच्छताम् ॥ ६१ ॥

महापद्मसुतान् सर्वानुद्धृत्यामात्यकोपितः ।
तत्पदे खलु चाणक्यश्चन्द्रगुप्तमतिष्ठिपत् ॥ ६२ ॥

स तु पद्मनिधिः शप्तः कुबेरेणान्तिकं गतः ।
यस्मादर्थिजनस्येच्छा न त्वया परिपूरिता ॥ ६३ ॥

नैव न्यायार्जितं वित्तं यत्त्वया यक्षजन्मना ।
तस्मान्मानुष एव त्वं भूयो भूय इति स्फुटम् ॥ ६४ ॥

स च त्वत्तनयो भूत्वा निवृत्तस्य वनादृषेः ।
पुरश्चयस्य साचिव्यं कृत्वा त्यक्ष्यति मर्त्यताम् ॥ ६५ ॥

इत्युक्त्वान्तर्हितो यक्षः पद्मः पद्मोद्भवाख्यया ।
आसीत् तस्य सुतः पश्चान्मन्त्री च श्वशुरस्य ते ॥ ६६ ॥

तस्य रत्नोद्भवो नाम सूनुः सागरमन्वगात् ।
वार्तापि तस्य साधोर्मे यावदद्य न विद्यते ॥ ६७ ॥

यौ सुश्रुतसुमन्त्राख्यौ तस्यास्तां तनुजाविमौ ।
सत्यशर्मसुगत्याख्यौ तनयौ मतिशर्मणः ॥ ६८ ॥

सुमित्रः कामपालश्च धर्मपालसुतावपि ।
सत्यशर्मा तु धर्मात्मा तीर्थयात्रामगाहत ॥ ६९ ॥

कामपालोऽपि कामात्मा क्वासौ न ज्ञायते गतः ।
अन्ये तु खलु चत्वारो य इमे मम मन्त्रिणः ॥ ७० ॥

इति ब्रुवति भूनाथे मुनिपुत्रः किशोरकम् ।
आश्चर्याकारमाश्लिष्यन्नाजगाम जगाद च ॥ ७१ ॥

अहमद्य कलिङ्गेषु तुङ्गदारुणिकानने ।
रामतीर्थान्निवृत्तः सन् प्राप्तोऽस्मि हरमन्दिरम् ॥ ७२ ॥

आराधयिष्यन् भूतेशमभ्यर्णे पुष्पभाजनम् ।
विनिधायारभे तत्र स्नातुं निर्झरवारिणि ॥ ७३ ॥

अथाभिरानयं देश कश्चिदत्युच्चभाषिणी । (?)
दृष्ट्वा किमिदमित्युक्ता प्रत्यूचे काचिदङ्गना ॥ ७४ ॥

श्रूयतां यवनद्वीपे वरिष्ठस्य वणिक्पतेः ।
कालगुप्ताह्वयस्याहं जाता दुहितृवर्धनी ॥ ७५ ॥

सा कन्या यौवनारंभे पुरुषद्वेषिणी पुनः ।
समुद्रदत्त कासीति मुमोहोपवने क्वचित् ॥ ७६ ॥

मया तु पृष्टा मत्प्रेम्णा रहसीदमभाषत ।
कृष्णगुप्तस्य नामाहं दुहिता पूर्वजन्मनि ॥ ७७ ॥

कदाचित्काम्यरूपेण पुंसा मे पितृसंनिधौ ।
इत्यालपन्तमश्रौषं भित्त्यन्तरनिषेदुषी ॥ ७८ ॥

समुद्रदत्तनामानं वणिजं गणयस्व मा ।
तस्य मे विधिवैषम्यात्कर्णीपुत्रेण मित्रताम् ॥ ७९ ॥

तेनापि गणिकाहेतोः परं वैरमभून्मम ।
कर्णीपुत्रः कळत्रं मे हर्तुं च प्रतिजज्ञिवान् ॥ ८० ॥

तत्राहमकृतोद्वाहस्तन्तुच्छेदामिया पुनः ।
गूढमुद्वोढुमिच्छामीत्यस्मै तातश्च मामदात् ॥ ८१ ॥

निगूढं तेन नीताहमुज्जयिन्यां निजं गृहम् ।
तदाप्यनुनयन्तं मा पुरुषं कंचिदैक्षिषि ॥ ८२ ॥

प्रत्याचष्ट समापृष्टः कर्णीपुत्रोऽस्मि सुव्रते ।
अपसर्पैरपेत्य त्वामुपासर्पं सुरङ्गया ॥ ८३ ॥

मन्त्रदेवतया च त्वां वशीकृत्य वणिक्कुले ।
कन्येति विनिधायाहमग्रहीषं ससाक्षिकम् ॥ ८४ ॥

समुद्रदत्तायाहं त्वां दर्शयित्वा भृशक्रुधम् ।
असाक्षिकविवाहं तं व्यजैषि विदुषां पुरः ॥ ८५ ॥

ततस्तद्गृहमेव त्वं नीत्वा रात्रौ सुरङ्गया ।
मद्दारचोर इत्येनं राज्ञा च निरवासयम् ॥ ८६ ॥

पतिव्रता मया तु त्वं न जीविष्यसि दूषिता ।
इत्यादिष्टासि तद्भद्रे यथेष्टं चेष्टतामिति ॥ ८७ ॥

तच्छ्रुत्वा मर्तुकामाहं गङ्गास्रोतोनिपातिनी ।
केनाप्युत्तारिता पुंसा सकृद्दृष्टैव मेऽभवत् ॥ ८८ ॥

स मा निबध्य निर्दोषां मरणान्यरुधत्पतिः ।
ततस्तातगृहं प्राप्य तत्रैवापामरं स्म हि ॥ ८९ ॥

लोकान्तरगते पत्यौ मृताहमिह जन्मनि ।
पूर्वोपभुक्तमुद्यानं दृष्ट्वा तत्सर्वमस्मरम् ॥ ९० ॥

इत्युक्ते तरुणः कोऽपि प्रणयस्निग्धया गिरा ।
समीपादुपसृत्यैनां प्रत्याश्वासयदञ्जसा ॥ ९१ ॥

अहमस्मि वरारोहे यस्ते प्राणसमो जनः ।
पुरावां हंसमिथुनं वाप्यां काप्यभवाव तौ ॥ ९२ ॥

नारदस्यार्चनांभोजेष्वावयोश्चञ्चुचापलात् ।
खण्डितेषु वियुक्त्यै नौ शशाप कुपितो मुनिः ॥ ९३ ॥

दृष्ट्वैतत्करुणाविष्टं कुमारं नलकूबरम् ।
शशाप मुनिरत्युग्रं पुत्रत्वेन तमावयोः ॥ ९४ ॥

प्रसादितः स सङ्गं नौ षोडशाब्दे वियुक्तयोः ।
जातस्य तस्याप्यादिक्षत्सखित्वं चक्रवर्तिना ॥ ९५ ॥

पुत्रः पद्मोद्भवस्याहं पुष्पपुर्यां वणिक्पतेः ।
रत्नोद्भव इति द्वाभ्यां सहजाभ्यां सहाभवम् ॥ ९६ ॥

सखित्वं राजहंसस्य कृत्वा मद्भ्रातरौ पिता ।
मां च पोतपतिं चक्रे कुलधर्ममलङ्घयन् ॥ ९७ ॥

वातवैषम्यतः पोते भग्ने मग्ने महार्णवे ।
स्वच्छन्दचारी दैवेन द्वीपेऽस्मिन्नवतारितः ॥ ९८ ॥

चिरदृष्टमिदं दृष्ट्वा वनं प्रत्यभिजानता ।
मया समभ्येत्याश्लिष्य प्रहृष्टतरमब्रवीत् ॥ ९९ ॥

अस्मन्मुखादिमां वार्तामाकर्ण्य च वणिक्पतिः ।
तस्मै कन्यां ददौ कंचित्कालं तत्रोषतुश्च तौ ॥ १०० ॥

ततः कुतश्चिदश्रन्याद्राजहंसाभिषेचनम् ।
भ्रात्रोर्मन्त्रिपदप्राप्तिं श्रुत्वा श्वशुरमन्दिरात् ॥ १०१ ॥

अन्तर्वत्नीं प्रियामादायागच्छन्दर्शनेच्छया ।
अर्णवे नावि मग्नायां दूरस्थो भर्तृदारकः ॥ १०२ ॥

न दृश्यते मया सार्धं लग्नैकफलके तु सा ।
वेलातटमनुप्राप्ता बाला वायुवशेरिता ॥ १०३ ॥

उत्तारितापि दैवेन प्रियसङ्गमनाशया ।
मया च मरणावेशाद्वराकी विनिवारिता ॥ १०४ ॥

पूर्णेषु दिवसेष्वस्मिन्नभ्यर्णे पर्णमन्दिरे ।
सुतं वनमृगीवैनं दीर्घायुषमसूत सा ॥ १०५ ॥

शीतार्तिहरणायास्याः पावकान्वेषणोन्मुखी ।
बह्वपाय इहेत्येनं गृहीत्वाहमिहागमम् ॥ १०६ ॥

इत्यस्मिन्नन्तरे घोरो महिषः प्रजघान ताम् ।
तं निहत्याभकं हन्तुं प्रावर्तत वनाद्विपः ॥ १०७ ॥

दृष्ट्वैतज्जातवैवर्ण्ये किंकर्तव्यतया मयि ।
सिंहं मृगानुसारी तमुत्क्षिप्य प्रजहौ गजः ॥ १०८ ॥

ततो गगन एवैनं फलान्तरधिया कपिः ।
गृहीत्वा मुहुराजिघ्रन्नङ्घ्रिपाग्रमगाहत ॥ १०९ ॥

तदग्रात्तत्करभ्रष्टोऽपतन्मे पुष्पभाजने ।
न जहौ जीवितं सा तु निःसंज्ञाभवदङ्गना ॥ ११० ॥

मातरं च विचिन्त्याहमकृतार्थः कुले कुले ।
लब्धैः स्तन्यरसैरेनं प्राप्तप्राणमिहानयम् ॥ १११ ॥

इत्याकर्ण्य मुदापूर्णः शुचा च नृपतिः सुतम् ।
पुष्पपात्रभुवा नाम्ना पुष्पोद्भव इति व्यधात् ॥ ११२ ॥

तस्मिन्नेवान्तरे तस्मिन्नपरोऽपि द्विजोत्तमः ।
कुमारमुपनीयास्य कथयामास तत्कथाम् ॥ ११३ ॥
तीर्थयात्रान्तरे राजन् कावेरीतीरवर्तिनम् ।
सर्वातिथिरिति श्रुत्वा प्राप्तोऽस्मि द्विजसत्तमम् ॥ ११४ ॥
शोकाविष्टममुं दृष्ट्वा तेनाहमभिनन्दितः ।
विविक्ते विप्रमप्राक्षं शोकवेगस्य कारणम् ॥ ११५ ॥
स च सर्वमवोचन्मे यथाहं मतिशर्मणः ।
सप्रशर्मेति निष्पन्नः पुत्रः पाटलिपुत्रके ॥ ११६ ॥
कृष्णसाराविहारार्हो याज्ञीयो देश उच्यते ।
ब्रह्मावर्तादिरत्रापि रम्या मगधभूमयः ॥ ११७ ॥
गृहस्थधर्मं धर्माणामुत्तमं जानतोऽपि मे ।
तीर्थयात्रारसः सर्वं निर्विचारमपाहरत् ॥ ११८ ॥
ततश्चरन्दिशं याम्यां मलयप्रस्थवासिनम् ।
कलशोद्भवमद्राक्षं स मामित्याशिषन्मुनिः ॥ ११९ ॥
सन्निवासे शुचावस्मिन् सह्याद्रिदुहितुस्तटे ।
नैष्ठिकत्वं विसृज्यैतत्क्रियतां दारसंग्रहः ॥ १२० ॥
इत्यादि(?)ऽस्म्यहं [स्थास्य] मत्वैकस्य द्विजन्मनः ।
कन्यामुदवहं मोहाद्वन्ध्या च भवति स्म सा ॥ १२१ ॥
कनीयसीं पुनः कन्यामुपयम्य सुलक्षणाम् ।
तस्यामुत्पादयन् पुत्रं पितृणामनृणोऽभवम् ॥ १२२ ॥
धायासमं स मे सूनुर्वर्षजातो न दृश्यते ।
स्नेहपाशेन गाढं मामबद्धं बद्धवान्मुनिः ॥ १२३ ॥
कुमारस्यापहर्तारं दिष्टशक्त्या परीक्षितुम् ।
अस्यां जनपदे नद्यां निमग्नस्तु नृपाज्ञया ॥ १२४ ॥

ज्यायस्यां मम जायायां मज्जन्त्यामपतज्जलम् ।
लोहितायितमालोक्य व्यस्मयन्त नृपादयः ॥ १२५ ॥

सापत्न्यादहमेवैनमप्सु क्षिप्तवती सुतम्
दण्डभीत्या मयेत्युक्ते व्यस्मेषन्ततरां प्रजाः ॥ १२६ ॥

क्रूरकर्मतया राज्ञा निगृहीता पुनर्वने ।
प्रोज्झितासुरिहैवासौ बभूव च पिशाचिका ॥ १२७ ॥

प्रतिज्ञातं तया भूयो यन्मे पुत्रविनाशनम् ।
तत्पश्यतो जुगुप्सा मे स्त्रीजातेऽपि महत्यभूत् ॥ १२८ ॥

असौ खल्वासुरी सृष्टिः निकृष्टजनसेविनी ।
अङ्गनेति विनाशाय मायेव भुवि निर्मिता ॥ १२९ ॥

सीमाभङ्गे लघुः सिन्धुर्धर्मच्छेदे मृदुः कलिः ।
रूक्षत्वे मुनयो दैत्याः स्त्री मायेव गरीयसी ॥ १३० ॥

इत्यालपन्तमुद्वेगात्समापृच्छ्य ततो गतः ।
अदूरे स्त्रियमुद्बध्य म्रियमाणामलक्ष्ययम् ॥ १३१ ॥

मोचिता तु मयाचख्यौ धात्रीं मां सत्यशर्मणः ।
पुत्रेण सह तद्भार्या चिक्षेप सरिदम्भसि ॥ १३२ ॥

महौघेनोह्यमाना तं मूर्ध्नि कृत्वा स्तनंधयम् ।
काष्ठभारावलम्ब्याहं बह्वावर्ते व्यवर्तिषि ॥ १३३ ॥

यावत्तत्रावलंबिन्या संस्कारतरुशाखया ।
तावद्दर्वीकरेणाहं दष्टा विटपवर्तिना ॥ १३४ ॥

कुमारं च दिदंशन्तं गृध्रः कोऽपि तमग्रहीत् ।
शाखामालंब्य चोत्तीर्णा मूढाहं विषमूर्च्छया ॥ १३५ ॥

ततो मुद्रादिकुर्वन्तं मुनिमासीनमन्तिकात् ।
दृष्ट्वा शिशुमपश्यन्त्या दृष्टेनामाथि चामुना ॥ १३६ ॥

न जाने शिशुमेवास्माद्विषमात्रमाचिक्षयम् ।
तत्परीक्षार्थमत्र त्वां दृष्ट्वैवं कृतवानिति ॥ १३७ ॥

ततस्तेन सहान्विष्य दारकं मरणोन्मुखी ।
निराशा जीवितत्यागात्त्वयेह विनिवारिता ॥ १३८ ॥

इत्याकर्ण्याहमप्येनमन्विच्छामीति गच्छता ।
कृत्तांघ्रि: पुरुष: कश्चिद्दृष्ट: पम्पातटे मया ॥ १३९ ॥

सोऽब्रवीद्भद्र कावेरीतीरवर्तिनमर्भकम् ।
आदाय दयया गच्छन् भग्नोऽस्मिन्नंबुरक्षसा ॥ १४० ॥

सरिदर्णसि मे हस्तादभ्रश्यदयमर्भक: ।
तं निशम्य निराशोऽहमाश्वास्यैनमयासिषम् ॥ १४१ ॥

शिंशुमारशरीरोत्थं कुमारं दाशदर्शितम् ।
लेभे वणिगिति श्रुत्वा प्राप्तवान् कोलपत्तनम् ॥ १४२ ॥

तस्मिन् कोलाहलं श्रुत्वा दाशदत्तो वणिक्सुत: ।
नष्ट इत्यथ तत्रैकं कूपे पुरुषमैक्षिषि ॥ १४३ ॥

स मयोत्तारित: प्रोचे वणिक्पुत्रोऽस्म्यौरस: ।
दाशदत्तसुतस्नेहान्मामनादृतवान् पिता ॥ १४४ ॥

तं कूपे क्षेप्तुकामेन प्रमादात्पातितं मया ।
तीर एव करभ्रष्टो न दृष्ट: पुनरर्भक: ॥ १४५ ॥

श्रुत्वैतद्दूह्यमाणस्तमुत्तरेण व्रजन् वने ।
अद्राक्षं पुरुषं कंचित्क्षतक्षतजवक्षसम् ॥ १४६ ॥

स जगाद मया पृष्ट: कुहाचित्कूपसन्निधौ ।
कुमारन्तं गृहं नेष्यन् रुरुणास्मि भृशं क्षत: ॥ १४७ ॥

विषाणपर्वलग्नेन कुमारेण ययौ मृग: ।
तमन्वेष्टुमशक्तोऽहं त्वयाप्यन्विष्यतामिति ॥ १४८ ॥

तच्छ्रुत्वाथ गृहीतोऽसौ रुरुशृङ्गगतः शिशुः ।
सार्थनार्या किरातेभ्यः वस्त्रं दत्वेति सत्वरम् ॥ १४९ ॥

गत्वाथ स्त्रियमप्राक्षं वस्त्रान्नीतो ममार्भकः ।
सार्थभङ्गे रुदन्त्या मे पापैरपहृतः करान् ॥ १५० ॥

इत्याकर्ण्य निवृत्तोऽहं निराशः पुनरैक्षिषि ।
श्रोणीलग्नेन बालेन व्याकुलां शबरस्त्रियम् ॥ १५१ ॥

सा जगाद मम भ्रात्रा दत्तः सार्थभृतः सुतः ।
पत्यामवत्समापत्यै...........हठादसौ ॥ १५२ ॥

अमर्षादहमप्येनमानीय त्यक्तुमक्षमा ।
विषण्णास्मीति तच्छ्रुत्वा तमादायाहमभ्यधाम् ॥ १५३ ॥

वामदेवाश्रमं गत्वा तद्गिराहमिहागतः ।
सखित्वे युक्त इत्येनं कुमारस्याहरामि ते ॥ १५४ ॥

इति श्रुत्वा तमाश्लिष्य प्रमोदपरमं नृपम् ।
देवरक्षितनामानं देवरक्षित इत्यधात् ॥ १५५ ॥

अथान्येन कुमारेण पुष्णन्ती . . मात्मनः ।
भुक्त्वास्थानगतं प्रीत्या प्राह स्म महिषी नृपम् ॥ १५६ ॥

अद्यापराह्णे बिभ्राणामधिश्रोणि स्तनंधयम् ।
दिव्ययोषितमद्राक्षं पृष्टा चैवमवोचत ॥ १५७ ॥

माणिभद्रस्य भद्रे मां विद्धि यक्षपतेः सुताम् ।
तारावलीति नामाहं विचरामि वरैषिणी ॥ १५८ ॥

काशिपुर्यां पितृवने प्ररुदन्तमिमं शिशुम् ।
उपलभ्य लघुस्नेहादनैषं पितुरन्तिकम् ॥ १५९ ॥

मत्पित्रा धनदस्यायं दर्शितः स धनेश्वरः ।
परापराणां विज्ञाता मामाहूयेदमब्रवीत् ॥ १६० ॥

कीदृशस्ते शिशावस्मिन् भाव इत्यहमब्रवम् ।
औरसे यादृगित्युक्ते तन्मूलं प्रभुरभ्यधात् ॥ १६१ ॥

पुरा शौनक इत्यासीत्कोसलेषु द्विजोत्तमः ।
सोमत्रातेन नामासावधीते स्म द्विजन्मना ॥ १६२ ॥

गुरौ सशिष्येऽभ्यस्थाने कदाचिन्नृपवेश्मनि ।
सुता बन्धुमतीत्येषा नियुक्ता परिवेषणे ॥ १६३ ॥

दृष्टयः पुनरन्योन्यप्रेमवृत्तिप्रवृत्तयोः ।
कन्याशौनकयोस्तत्र संजग्मे मिथुनं मिथः ॥ १६४ ॥

ततो गर्तेश्वरः कन्यामुपयन्तुमुपाययौ ।
तस्मै धात्रेयिकां कन्येत्युपनिन्ये सखीजनः ॥ १६५ ॥

शौनकः स तन्वङ्ग्या निर्गतः सरयूजले ।
भिन्ननौर्नष्टपत्नीक तामान्विष्यन्न दृष्टवान् ॥ १६६ ॥

शकुन्तलुप्तशेषन्तं तीरे दृष्ट्वा कळेबरम् ।
मृता सेति विलप्यासौ चक्रे तच्चाग्निसाद्वपुः ॥ १६७ ॥

नीत्वा तत्कीकसं तीर्थान्युद्वेगादाश्रमे क्वचित् ।
प्रायोपवेशमारेभे तापस्याकथयत्कथाम् ॥ १६८ ॥

श्रुत्वा बन्धुमतीवार्तां निर्गत्य सहसा गृहात् ।
अहं ते दयितेत्यङ्घ्रौ निपत्येदमवाच सा ॥ १६९ ॥

स्रोतसा नीयमानाहं कयाचिद्द्रोपकन्यया ।
उत्तारिता ततस्तीरे भुजङ्गस्तामभारयत् ॥ १७० ॥

आर्यपुत्रेण तत्कायं प्रायः स्यादग्निसात्कृतम् ।
अहमप्यत्र तापस्या नियमं ग्राहितानया ॥ १७१ ॥

इत्यस्मिन्नन्तरे बन्धुमत्यास्तत्र पिताययौ ।
कन्यावञ्चनया क्रुध्यद्गर्तेश्वरवित्रासितः ॥ १७२ ॥

ततः शौनकसाहाय्यात्प्रत्यापन्ननिजास्पदः ।
राज्यार्द्धं च ददौ तस्मै जामात्रे कोसलेश्वरः ॥ १७३ ॥

हंसावलीवेदिमत्यौ प्रियासख्यौ च शौनकः ।
उपयम्य नटीं चौकां विजहारात्ममायया ॥ १७४ ॥

आयुषोऽन्ते स एवासावश्मकेषु द्विजोत्तमः ।
इन्द्राणिगुप्त इत्यासीद्यं प्राहुः शूद्रकं बुधाः ॥ १७५ ॥

अथावज्ञातया शप्तः प्राप्य ब्रह्मश्रिया निशि ।
राजश्रियमपायानामन्ते गन्ता भवानिति ॥ १७६ ॥

स्वातिनाम्ना सहैवासौ ववृधे राजसूनुना ।
क्रीडाकलहमारभ्य स्वैरं वैरमभूत्तयोः ॥ १७७ ॥

बन्धुदत्तादिभिर्मित्रैरेकदा विहरन् वने ।
दुरुद्वहतरामन्यैरधारयदसौ शिलाम् ॥ १७८ ॥

शाक्यः संघिलको दृष्ट्वा बलं तस्यावधारयत् ।
तमेकाकिनमादाय प्रविवेश बिलान्तरम् ॥ १७९ ॥

रसोद्धरणकाले तु जिघांसंतन्निहत्य सः ।
दरीपतनदुःखादीननुभूय वने चरन् । ॥ १८० ॥

ततो विश्वलकं लब्ध्वा सुहृदं विन्ध्यगह्वरे ।
स्त्रिया कयापि तं रात्रौ भक्ष्यमानमलक्षयत् ॥ १८१ ॥

क्रुद्धेन तु गृहीता सा मुक्तशापा दिवं ययौ ।
सौहृदय्यं निगृह्यान्तः प्रतस्थे पुनरप्यसौ ॥ १८२ ॥

स गृहे शाक्यभिक्षुण्या वञ्चयित्वा जिघांसितः ।
दुःखप्रबोधितस्तस्माद्वैदिशाभिमुखो ययौ ॥ १८३ ॥

सुहृद्भिः सहितो भूत्वा बन्धनागारवर्तिनम् ।
बन्धुदत्तं ततो हृत्वा जगामोज्जयिनीं प्रति ॥ १८४ ॥

बन्धुदत्तगृहं गत्वा तस्मिन् भरतकन्यया ।
अनुरक्तः सरागिण्या रेमे रङ्गपताकया ॥ १८५ ॥

ततो विनयवत्याख्यामुद्याने नृपकन्यकाम् ।
दृष्ट्वा दृष्टिविषेणान्तः स्पष्टं दष्ट इवाभवत् ॥ १८६ ॥

कन्दर्पसर्पदष्टान्तर्दृष्टा दर्वीकरेण च ।
सा तु शूद्रकसंस्पर्शेनोभयस्मा अजीव्यत ॥ १८७ ॥

ततः कन्यापुरं गच्छन् रात्रौ हृच्छूयमूर्च्छया ।
स्त्रैणाध्यक्षजनैः क्रुद्धैर्वध्योऽसावित्यबध्यत ॥ १८८ ॥

ततः कथंचिन्निर्मुक्तो मृत्युप्रायादपायतः ।
धात्रीमुखेन तां कन्यामपहृत्य ययौ पुरात् ॥ १८९ ॥

मार्गे माळवराजेत प्रसह्यापहृतां प्रियाम् ।
उपलभ्य तृषा तस्याः पानीयार्थी ययौ स्वयम् ॥ १९० ॥

विना विनयवत्यासौ गच्छन् कृच्छ्रमनीयत ।
वने वनचरभ्रान्तैः कारां चोरचमूपतेः ॥ १९१ ॥

तत्कन्ययानुभूयासावार्यदास्यभिधानया ।
अमुच्यत तया छन्नं बन्धनाद्रूढरागया ॥ १९२ ॥

ततः प्रियां परिभ्राम्यन् विन्ध्यकाननलुब्धकात् ।
लीनां विप्रकुले क्वापि श्रुतौ सत्वरमभ्ययौ ॥ १९३ ॥

ततोऽपि मथुरां नीतामाकर्ण्य मथुरां ययौ ।
द्विजेन स्वदनूजायाः सखित्वे वर्ततामिति ॥ १९४ ॥

तत्र स्नानः सरस्तोये निहितः स्तेयदर्शिना ।
पुरुषाश्चोर इत्येनं निन्युर्बद्धभुजद्वयम् ॥ १९५ ॥

दृष्ट्वा विनयवत्येनं भर्तारं चोरचिह्नितम् ।
अमात्येन सखी पित्रा क्षणं मृत्योर्न्यवर्तयत् ॥ १९६ ॥

उपहारकृते रात्रौ पशुवन्मारितोऽप्यसौ ।
न जहौ जीवितं भूयः प्रेयस्या समगच्छत ॥ १९७ ॥
स तु मालव एवासीदास्ते यस्या गृहे प्रिया ।
तत्कन्यामपि तन्वङ्गीमुपयेमे स यज्ञदाम् ॥ १९८ ॥
मथुरेन्द्रदुहित्रासौ रमितः शूरसेनया ।
वसन् मृत्युमुखप्रायानपायानयमन्वभूत् ॥ १९९ ॥
बहूनां विपदामन्ते विगृह्य स्वातिना सह ।
बालमित्रमहत्वैनं जीवग्राहमजिग्रहत् ॥ २०० ॥
सुहृद्भिर्दयिताभिश्च प्रथितप्रेमभिः सह ।
शतं समाः क्ष्मामेकः शशास चतुर्णवाम् ॥ २०१ ॥
ब्रह्मरक्षोनियुद्धेन मत्वैव परमेश्वरः ।
धर्मपालस्य नामासीत् कामपालाख्यया सुतः ॥ २०२ ॥
स कदाचित्सखीमध्ये क्रीडन्तीं दिव्यकन्यकाम् ।
पश्यन् कान्तिमतीं नाम श्रान्तां कन्दुकलीलया ॥ २०३ ॥
अभिपन्नशरीरोऽभूद्दशरारिशरव्यताम् ।
अनुक्त्वा विकृतिं तस्या दुर्गोचरतया गिराम् ॥ २०४ ॥
विक्रीणा सा गुणांस्तस्य प्राणादिधनमात्मनः ।
मनो विनिमयं कृत्वा कन्या कन्यागृहं गता ॥ २०५ ॥
असुभ्योऽपि गरीयस्यः सोमदेवीसुलोचने ।
इन्द्रसेनेति तत्सख्यः स्मरवेगमगोपयन् ॥ २०६ ॥
कामपालप्रियं दृष्ट्वा सखीभिश्चाभिनन्दितः ।
तया प्रहितमेकान्ते कामलेखमलम्भयन् ॥ २०७ ॥
स्मरमन्थरया बुध्या निर्मितानि नतभ्रुवा ।
अनङ्गपत्रे तत्रासन्मधुराण्यक्षराण्यपि ॥ २०८ ॥

"मुग्धा पञ्जरहंसी चन्द्रे निर्वर्ण्य पुण्डरीकधिया ।
स्फुरितानि तान्यपि तद्दभिलाषबलात्कृता कुरुते" ॥ २०९ ॥

अमन्दानन्दसन्दोहमनुभूयेति वाङ्मयम् ।
मृदुवल्कलमालूय प्रतिलेखमथाकरोत् ॥ २१० ॥

कान्तिमत्यपि चिन्ताब्धेस्तरणोपायदर्शिनीम् ।
सखीव प्रियसंदिष्टां तस्मिन्नार्यामवाचयत् ॥ २११ ॥

"यद्यभिलषसि; द्विजवरमवेहि तं राजहंसि जलमध्ये ।
गतमेव चरणगोचरमचिरात्मतिनामुखेनापि" ॥ २१२ ॥

तद्गुणस्मरणेनास्यामसह्यज्वरकारिणि ।
यदसौ नृपकन्यायामनार्यं कृतमार्यया ॥ २१३ ॥

इन्द्रसेनाख्यया सख्या कृत्वा गुप्तस्मराकृति ।
तत्संग्रहच्छलेनासावन्तःपुरमनीयत ॥ २१४ ॥

तत्राविदितनिर्वृत्तक्षत्रोचितकरग्रहः ।
रममाणः स तास्तिस्र उपयेमे प्रियासखीः ॥ २१५ ॥

आपन्नसत्त्वा सा देवी प्रच्छन्नं सुषुवे सुतम् ।
रात्रौ पितृवनं नीत्वा त्यक्तः स शबरस्त्रिया ॥ २१६ ॥

क्षुधार्तेत पिशाच्यैष भक्ष्यमाणस्वसूनुना ।
रुद्धो मे प्रातराशोऽस्त्वित्युभयोः कलहे सति ॥ २१७ ॥

राक्षिदर्शनसम्भ्रान्त ........ बध्वासौवध्यभूमिमनीयत ।
तस्मिन् बन्धनमेवास्याच्छिन्नन्मारणसम्भ्रमे ॥ २१८ ॥

ततो निघ्नत एवासौ निहत्य प्रययौ स्वयम् ।
बह्वपायमिते तस्मिन्नपहाय शिशुं ययौ ॥ २१९ ॥

सपुत्रा च पिशाची सा विभाता च विभावरी ।
इयं तारावली तत्र प्रयान्ती शिशुमग्रहीत ॥ २२० ॥

अस्याः पुत्र इवामुष्मिन् भावहेतुं निशम्यताम् ।

शौनकः शूद्रको भूत्वा कामपालोऽद्य वर्तते ॥ २२१ ॥
बन्धुमती विनयवत्यभिन्ना कान्तिमत्यपि ।
यज्ञदासीद्विदिमती सोमदेवी च वर्तते ॥ २२२ ॥
हंसावली शूरसेना सैवास्ते च सुलोचना ।
धात्रेयिका नन्दनिकेत्यनुरक्ता च शौनकम् ॥ २२३ ॥
मध्ये रङ्गपताकासीदिन्द्रसेना च जायते ।
या सा गोपवधूः पूर्वं शौनकेनाग्निसंस्कृता ॥ २२४ ॥
आर्यदास्यपि सौत्रासीत्पुनस्तारावली च सा ।
अस्यामेवार्यदासो ते जातः सोऽयं कुमारकः ॥ २२५ ॥
शूद्रकादद्रिसारास्थः पुत्रस्नेहस्तु तत्कृतः ।
अर्थपाल इति व्यक्तं मन्नामैव भवत्वयम् ॥ २२६ ॥
वर्द्धयित्री वसुमती तत्तस्यै दीयतामसौ ।
इत्यादिष्टा धनेशेन प्रज्ञानेनाभिहागता ॥ २२७ ॥
इत्यर्पयित्वा हस्ते मे तत्रैवान्तरियाय सा ॥ २२८ ॥

मुदितवान् नृपतिः स निशम्य हा
मुदितवागमृतैः सह मन्त्रिभिः ।
अनयदूषितबुद्धिरिमां निशा-
मनयदूढमदन्तु....त्वथ........ ॥ २२९ ॥

इति दशभिरमीभिः प्रत्यहं वर्द्धमानैः
शशिनमिव विशेषैः कान्तिमद्भिः कलानाम् ।
ललितगुणविशेषं वीक्षमाणः कुमारान्
नृपतिरवजगाहं मध्यमानन्दसिन्धौ ॥ ॥ २३० ॥

॥ इत्यवन्तिसुन्दरीकथासारे चतुर्थः परिच्छेदः ॥

# अथ पञ्चमः परिच्छेदः ॥

अत्राश्रमे मृगैः सार्द्धं वर्द्धमानेषु सूनुषु ।
वामदेवमुपासीने नृपे च सचिवैः सह ॥ १ ॥

वाजिरत्नं गजेन्द्रं च प्रशस्ता बडवा अपि ।
आदायाभिगतो व्याघ्रदमनः समदृश्यत ॥ २ ॥

भद्रवाहनमश्वं च हेमकूटमपि द्विपम् ।
पश्यन्नुत्पत्तिमाश्चर्यामित्यूचे मुनिरेनयोः ॥ ३ ॥

आदिसर्गे पुरा स्रष्टुः शीर्यन्ताशुबिन्दवः ।
होमधूमस्पृशो नेत्रात् तत्राश्वा बडवा अपि ॥ ४ ॥

पुरुषश्च ततो जातः स सुराणामथाध्वरे ।
प्रणष्टां वाचमन्वेष्टुं जगाम जलवर्त्मना ॥ ५ ॥

मत्स्यापदेशात् तं देवा ददृशुर्जलचारिणम् ।
सुरप्रार्थनया गत्वा यज्ञसाहाय्यकं व्यधात् ॥ ६ ॥

विश्वावसुमुखैर्देव्यैः सेव्यमानः कदाचन ।
विलम्ब्यागमनं तेभ्यः स शुश्रावेन्द्रसेनया ॥ ७ ॥

अथेन्द्रपदमादित्सुस्तपस्यन्नप्सरःस्त्रिया ।
शक्रप्रार्थनया हित्वा तपो रेमे मनोज्ञया ॥ ८ ॥

तयोरन्योन्यशापेन मृग्युलूकत्वमीयुषोः ।
अनेकशतमश्वानामण्डात्पक्षवतामभूत् ॥ ९ ॥

शालिहोत्रो मुनिः पश्यन् देवसस्यविलोपिनः ।
शिष्यवत्परिगृह्याश्वान् पक्षच्छेदमथाकरोत् ॥ १० ॥

पित्रोः स्वरूपलाभादीनुपलभ्य बहून्वरान् ।

तुरगास्ते सुरेन्द्राणां बभूवुर्वाहनान्यमी ॥ ११ ॥
पक्षच्छेदकृतामर्षैर्भक्ष्यमाणमृषिं हयैः ।
दृष्ट्वा हसन्त्यप्सरसः क्रुद्धस्ताः शप्तवान् मुनिः ॥ १२ ॥
बडवा भवितेत्येषः प्रतिशप्तश्च वाजिणा ।
अश्वयोनौ पतिस्तासां भवानेव भवत्विति ॥ १३ ॥
ता एता बडवाः सोऽयं तुरगश्च मुनिश्चिरः ।
राजवाहनवाहानां शापश्च प्रसवावधि ॥ १४ ॥
ऐरावतसुतो हस्ती यत्प्रभावाद्भुवं गतः ।
मालवेन्द्राहवादूर्ध्वं वनेऽस्मिन् विहरत्यसौ ॥ १५ ॥
इत्यादिश्य कथामेतां जगाम स्वाश्रमं मुनिः ।
नृपश्च परया प्रीत्या गजाश्वबलमग्रहीत् ॥ १६ ॥
ततः सर्वे यथाकालं कृतोपनयनादयः ।
अवर्द्धन्त मृगेन्द्राणां किशोरा इव दारकाः ॥ १७ ॥
तेभ्यः सर्वासु विद्यासु धनुर्वेदे कलासु च ।
विशिष्टः षोडशं वर्षं जगाहे राजवाहनः ॥ १८ ॥
आशाविजयकालोऽयं कुमारस्येति मन्त्रिभिः ।
विज्ञापिते बलाद्राज्ञोऽप्यन्वज्ञापि हराज्ञया ॥ १९ ॥
वामदेवः प्रयाणाय प्रणमन्तमनन्तरम् ।
उपहूयैवमेकान्ते राजवाहनमब्रवीत् ॥ २० ॥
कुमार ज्ञातवेद्येषु त्वादृशेष्वनुशासनम् ।
श्रम एव पितुः स्नेहाद्वाचमेवं हितं वचः ॥ २१ ॥
रुध्यतामिन्द्रियग्रामः परग्रामस्ततस्त्वया ।
जीयतामरिषड्वर्गः प्रथमं तदनु द्विषः ॥ २२ ॥
सन्ध्यादिभिर्गुणैः षड्भिः शक्तिसिध्युदयादिभिः ।

साध्यं विधिवदारब्धैः स्वामित्वं विजिगीषुणा ॥ २३ ॥
विशुद्धामात्यमित्रेण श्रुतिशास्त्रानुरोधिना ।
अद्वितीयातपत्रेयं त्वत्पित्रा रक्षिता क्षितिः ॥ २४ ॥
असकृत्परिभूतेन मानसारेण मानिना ।
हरप्रसादादद्यैषा विजित्य स्वसुते कृता ॥ २५ ॥
मानसारो वनं गन्तुं प्रवृत्तोऽपि निजे गृहे ।
वसत्यवन्तिसुन्दर्या दुहितुर्वरलिप्सया ॥ २६ ॥
दर्पसारः सुतः श्याले प्रचण्डे चण्डवर्मणि ।
कृत्वा राज्यं हरावासे गिरावद्य तपस्यति ॥ २७ ॥
आत्माधीनां विधेहि त्वं विजित्य वसुधामिमाम् ।
एतावतीयमायुष्मन् विजेतव्या वसुन्धरा ॥ २८ ॥
सप्तद्वीपार्णवाकीर्णा सप्तगोत्राचलाकुला ।
नववर्षधृतेयं ते भविष्यति वशे क्षितिः ॥ २९ ॥
स्फीतः सर्वहितायोर्व्यां विष्णोरंशस्त्वदात्मना ।
मासद्वयावधिर्नूनं भावी परिभवश्च ते ॥ ३० ॥
श्वः प्रशस्तं महश्चन्द्रे रेवतीयोगशालिनि ।
मुहूर्ते विजयायास्मात् सुहृद्भिः सह गम्यताम् ॥ ३१ ॥
इत्थं यद्यन्मुनिर्विद्वान् मेधाविनमबूबुधत् ।
अबुध्यततरां तत्तत्कुमारः किं बहूच्यते ॥ ३२ ॥
ततः कुमारमारेभे कृतप्रास्थानिकश्रियम् ।
वामदेवं नमस्कृत्य प्रस्थानाय परेऽहनि ॥ ३३ ॥
अद्रीभवन्तौ ध्यायन्तौ मङ्गलानि पदे पदे ।
प्रणतः पितरौ ताभ्याममुच्यत कथञ्चन ॥ ३४ ॥

अनुज्ञाप्य गुरून्सर्वान् कृत्वा शंकरदारकम् ।
सुहृदं सिंहदमनं गुरूणां परिरक्षणे ॥ ३५ ॥

अपहारमुखैर्मित्रैरमित्रजयकांक्षिभिः ।
जैत्रेण सुमुहूर्तेण प्रतस्थे दिशमुत्तराम् ॥ ३६ ॥

तेषां दक्षिणतः कोऽपि ब्रह्मचारी द्विजोत्तमः ।
शरत्समृद्धिसम्बन्धं वसन्ततिलकं जगौ ॥ ३७ ॥

सप्तच्छदस्तबकचामरधूननोऽयं
जातो मरुद्धनसितं वियदातपत्रम् ।
हारप्रसादि सरिदम्बु सरोजलीलः
कालोऽयमुद्भवति नन्दितराजहंसः ॥ ३८ ॥

इत्यन्यानि च लब्ध्वा ते सुनिमित्तानि सर्वतः ।
वैखानसकुले निन्युर्दिनं नातिदवीयसि ॥ ३९ ॥

सुमतिप्रमुखास्तस्मिन्नमात्याः स्वसुतानपि ।
आत्माधिकारसम्बद्धैरुपदेशैराशिक्षयन् ॥ ४० ॥

कथमप्यनुगच्छन्तं निपत्य स्वजनं पुनः ।
शून्यं विन्ध्यवनोद्देशं जग्मुर्निर्झरिणीतटे ॥ ४१ ॥

तत्रैकस्मिन्समाधिस्थं तरुमूलतले द्विजम् ।
व्रणकर्कशकायं ते ददृशुश्चीरवाससम् ॥ ४२ ॥

उपसृत्य समासीनैरभिनन्दितसत्क्रियैः ।
पृष्टस्तैरयमात्मानं व्याहर्तुमुपचक्रमे ॥ ४३ ॥

अनास्वादितवेदेषु व्याधविद्योपजीविषु ।
मातङ्ग इति तन्नामा जातो विप्रकुलेष्वहम् ॥ ४४ ॥

स कदाचिद्धनुष्पाणिर्वने वनचरैः सह ।
चरन् ब्राह्मणमायान्तं वर्षीयांसमलक्ष्यम् ॥ ४५ ॥

जरत्कर्पटलोभेन प्रतिबद्धाः प्रसह्य माम् ।
जरापरवशे तस्मिन् प्रजह्रुस्ते जनङ्गमाः ॥ ४६ ॥

तेषां त्रिचतुरान् हत्वा दयया तममोचयम् ।
शेषा मां तिलशः कृत्वा जग्मुस्तेऽपि किरातकाः ॥ ४७ ॥

मृतोऽहं प्रेतभर्तारं दृष्टवान् विष्टरे स्थितम् ।
स मा नित्योग्र पश्य त्वं नरकानित्यभाषत ॥ ४८ ॥

चित्रगुप्तस्तदाज्ञप्तः पद्मादीन्नरकान् बहून् ।
अदीदृशत् दुष्कृतिभिर्भोक्तव्यांस्तान् विभागशः ॥ ४९ ॥

दृष्ट्वा विस्मयमानस्तैः स्मर्यमाणसुदुःसहैः ।
नित्योग्रेति कथं प्राह प्रभुरित्यहमब्रवम् ॥ ५० ॥

चित्रगुप्तस्तदाचख्यौ शबरेन्द्रस्य कस्यचित् ।
चौर्यलब्धधनः कश्चित्कोलाहलिक इत्यभूत् ॥ ५१ ॥

स मूर्खः पथिकान् निघ्नन् कदाचिद्विधवां स्त्रियम् ।
न्यरुणत्पुरुषं चैकं युवत्या च स्त्रिया सह ॥ ५२ ॥

हा दीर्घदर्शिन् हा पुत्र नित्योग्रेति मुहुर्मुहुः ।
आक्रन्दन्तीं पुलिन्दस्तां भद्रे कासीति सोऽब्रवीत् ॥ ५३ ॥

सोचे मन्त्री विदर्भाणां दीर्घदर्शीति मे पतिः ।
स नित्योग्रमहोग्राविन्यात्मजौ मय्यजीजनत् ॥ ५४ ॥

श्रुतं कार्तान्तिकाद्राज्ञा मत्पुत्रो राज्यभागिति ।
बाल एव स नित्योग्रो राज्ञा चौर्यापहारितः ॥ ५५ ॥

तद्भीत्या मातुलावासं कनीयानप्यनीयत ।
ततः कदाचिन्मे भर्ता रहसीदमुदाहरत् ॥ ५६ ॥

अथेहाच्युतकस्याहं भागिनेयस्य नो गृहम् ।
निमित्तेन निशि प्राप्तः श्रुतवान्तन्नरेश्वरः ॥ ५७ ॥

राज्ञा जालंधरेणाहमाहूयाभिहितोऽधुना ।
मातुलस्य तवापत्यं राजा किल भविष्यति ॥ ५८ ॥
पिता चैनं प्रसह्यास्मान् विवर्द्धयति दुर्मतिः ।
असंशयमसौ वध्यस्त्वया मत्प्रियकारिणा ॥ ५९ ॥
निशम्यैतन्नृपादिष्टं क्रियतामविलम्बितम् ।
इति स्वप्रियया प्रोक्ते क्रुद्धस्तामयमभ्यधात् ॥ ६० ॥
कर्तुं मातुलपुत्रेऽहं नैतत्साहसमुत्सहे ।
इत्यस्मिन्नन्तरे प्रीत्या तस्यात्मानमदीदिशत् ॥ ६१ ॥
इत्थं प्रोचे कथं गत्वा कृत्वा पुस्ताशिरः करे ।
तच्छिरश्छद्मना छित्वा प्रत्यागच्छन्नृपान्तिकम् ॥ ६२ ॥
तथेत्यच्युतकेनोक्ते निवृत्तोऽसीत्यनन्तरम् ।
स मयोक्तं ततः कृत्वा नृपायापि न्यवीविदत् ॥ ६३ ॥
विमनायितमालोक्य स्वदुर्णयधियेत्यसौ ।
पतिं मे नृपतिर्नक्तं विविक्ते हन्तुमाह्वयत् ॥ ६४ ॥
रात्रौ मा हन्तुमारब्धो राज्यलोभादसाविति ।
प्रख्याप्य राज्ञा पापायाः पतिर्मे विनिपातितः ॥ ६५ ॥
तस्मादच्युतको माम्प्यनैषीत्पितुरन्तिकम् ।
तस्मादपि परिभ्रष्टा ततस्तस्करसम्भ्रमे ॥ ६६ ॥
त्रस्तः किं तस्करैरित्थं भ्राम्यन्ती पुत्रचिन्तया ।
उद्भ्रमती मृतोत्साहा ददर्श तरुमूर्ध्नि तम् ॥ ६७ ॥
सोऽब्रवीदम्ब दस्युर्मां बलादादाय निर्गतः ।
कृष्णसर्पेण दष्टस्तद्भीत्यारूढोऽस्मि शाखिनम् ॥ ६८ ॥
इत्याकर्ण्य पुनर्जातं पुत्रमादाय तद्गृहम् ।
गत्वा दस्युहते जाते शोकार्णवमगाहिषि ॥ ६९ ॥

नष्टे ज्येष्ठे सुते पत्यौ हते पितरि मारिते ।
महोग्रमात्रमासीन्मे जीवितस्यावलम्बनम् ॥ ७० ॥

तरुणीभूतमद्यैनं परिणाय्यामुना पथि ।
स्नुषया च सहायान्ती भवद्भिर्भद्र विद्रुता ॥ ७१ ॥

इति श्रुत्वा स एवाहं नियोग्रस्तनयस्तव ।
इत्युदञ्जलिराह्लादी पुळिन्दस्तामवन्दत ॥ ७२ ॥

ततो मातरमादाय मात्रा च शबरैः सह ।
गत्वा जालन्धरं रात्रौ जघान पितृघातिनम् ॥ ७३ ॥

स्वजनैः सह माता च तत्रानन्तरभूपतेः ।
महोग्रं मन्त्रिणं कृत्वा जगाम वनमेव सः ॥ ७४ ॥

महोग्रः स गतो भक्त्या हस्तिवक्त्रसलोकताम् ।
दीर्घदर्शी विदेहेषु प्रहाराख्योऽभवन्नृपः ॥ ७५ ॥

ततस्त्रिस्रोतसः शापान्मानुष्यकमुपेयुषा ।
गणेशेन सह प्राप्तः महोग्रश्च मनुष्यताम् ॥ ७६ ॥

अपहारोपहाराख्यौ प्रहारस्य सुतौ च तौ
योऽसावच्युतकः सोऽभूद्धनमित्राख्यया वणिक् ॥ ७७ ॥

उत्पन्नः सोऽपि नियोग्रः कर्मवासनया पुनः ।
चण्डकृष्ण इति व्याधस्तं जघान रिपुश्चयः ॥ ७८ ॥

नरकान् विविधाकारानुभूय सहस्रशः ।
जातो विप्रकुलेषु त्वं प्राप्तश्च गतिमुत्तमाम् ॥ ७९ ॥

ब्राह्मणस्य कृते प्राणैस्त्वं नैनसममोच्यथाः ।
पुरेव निरयान्भूयोऽप्यविषह्यानमोक्ष्यथाः ॥ ८० ॥

लौकिकानां हिताय त्वं प्रविश स्वं कळेबरम् ।
इत्युक्तमात्रे मन्नेत्रे तत्रैवोन्मीलिते मया ॥ ८१ ॥

बन्धुभिः स्वगृहं नीत्वा विहितव्रणरोपणः ।
स्वस्तिमान् ब्राह्मणात्तस्मादश्रौषं च श्रुतीः स्मृतीः ॥ ८२ ॥

अमानुषत्वकामं मां साक्षाद्भूयायुगेक्षणः ।
अब्रवीत्सोमशापास्त्रं क्षान्तो वत्स कपिञ्जलः ॥ ८३ ॥

गन्ताद्य नमुचेर्लोकं लभस्व बिलवर्त्मना ।
विन्ध्यपार्श्वगतस्तस्मिन् सहायं च तवाप्स्यसि ॥ ८४ ॥

इत्याकर्ण्य कुमारास्ते तस्मिन् विस्मितमानसाः ।
अवसन् दिवसान् कांश्चित् प्रीत्या तदनुरोधतः ॥ ८५ ॥

ततो मातङ्गकः सुप्तान्मुक्त्वा भक्तानुकम्पिनम् ।
राजवाहनमादाय प्रविवेश रसातलम् ॥ ८६ ॥

बिलकल्पोपदिष्टेन प्रविष्टो यन्त्रवर्त्मना ।
रम्यं पुरमलोकेतां ताम्रप्राकारगोपुरम् ॥ ८७ ॥

स्नात्वा सरस्युपस्पृश्य प्रविश्य नगराङ्गणे ।
जातवेदसमुत्पाद्य स्थापितैः समिदादिभिः ॥ ८८ ॥

हुतं मातङ्गकः कृत्वा रक्षायां राजवाहनम् ।
कल्पोक्तेन विधानेन प्रावर्तत निरर्गळम् ॥ ८९ ॥

न शक्ष्यन्ति न सन्देहः प्रत्यूहा राजवाहने ।
इदं तु चित्रं तत्रापि प्रवृत्ता विहिता अपि ॥ ९० ॥

हुतेऽशरीरी केयूरी कृपाणी मकुटी क्षणात् ।
बभूव स्यन्दनीभूते निषण्णः कृष्णवर्त्मनि ॥ ९१ ॥

प्रभाप्रवाहे मज्जन्ती स्वलावण्याम्बुवर्षिणी ।
रमणीयतरा काचित् तरुणी प्रत्यदृश्यत ॥ ९२ ॥

सा तमभ्रिरथं दृष्ट्वा निरीक्ष्य स्निग्धया दृशा ।
स्वामिन्ननुगृहीतास्मीत्याचख्यौ राजवाहनम् ॥ ९३ ॥

तावन्तःपुरमानीय स्वर्गस्पर्द्धिसमृद्धिमत् ।
सम्भाव्य स्निग्धया वाचा दिव्ययोषिदभाषत ॥ ९४ ॥

मन्दाकिनीति नामास्मिन्नुत्पन्ना नमुचेरहम् ।
मृते पितरि पुत्रीव नरकेणास्मि वर्द्धिता ॥ ९५ ॥

कन्या यज्ञवतीत्यन्या तस्यासुरपतेरभूत् ।
आवयोरपराप्यासीत्परं मित्रं तिलोत्तमा ॥ ९६ ॥

ततो यज्ञवती जातु व्यञ्जितस्मरसंज्वरा ।
किमप्युदमनायिष्ट स्नेहादस्मभ्यमभ्यधात् ॥ ९७ ॥

धर्मदेव इति ख्यातः पुरासीत्पुरुषोत्तमात् ।
तत्पत्नीपदधन्यं मे जीवनं पूर्वजन्मनि ॥ ९८ ॥

प्रिये गुरुनियोगेन प्रोषिते बदरीवने ।
दवदग्धा तदेवाद्य स्मराम्यस्मिन् भवान्तरे ॥ ९९ ॥

इत्युन्मनसि तन्वङ्ग्यां कदाचित्तत्समाकृतिम् ।
कुमारं कञ्चिदाहृत्य व्याजहार तिलोत्तमा ॥ १०० ॥

जाम्बवत्यामसौ जातः साम्ब इत्यम्बुजेक्षणात् ।
मनोरथानां भूमिस्ते महीरक्षार्थमागतः ॥ १०१ ॥

चिरदृष्टं वनं दृष्ट्वा प्रिये यज्ञवतीयसौ ।
तव स्मृत्या मुहुर्मूर्च्छां गच्छन्नीतस्तवान्तिकम् ॥ १०२ ॥

इत्युक्त्वा क्षणनिष्पन्दं मन्देतरमनोरथम् ।
आनन्दाम्रमिवारूढं तद्द्वन्द्वं समजीगमत् ॥ १०३ ॥

गणरात्रात्यये दैत्यैः श्रुत्वा यज्ञवतीं हृताम् ।
साम्बं प्राग्ज्योतिषं जेतुं प्रवृत्तं क्रुद्धया धिया ॥ १०४ ॥

नारदस्य गिरा गत्वा द्वारकां गुरुभिः सह ।
जित्वा दैत्यपतौ स्वर्गं जेतुं याते हरिप्रियाम् ॥ १०५ ॥

अमर्षज्वलिते भीमे युधि स्मर्तव्यतां गते ।
स्नुषासखीति नीताहं पुरेऽस्मिन्नसुरद्विषा ॥ १०६ ॥

महाश्वेतादयः सख्यो गन्धर्वतनया अपि ।
महाश्वेता त्वहं जातु प्रणन्तुं पङ्कजेक्षणम् ॥ १०७ ॥

व्रजन्ती तरुणं कंचित्पतन्तं मकरालये ।
दृष्ट्वा दृष्टिबलाद्भावं तस्मिन्नकरवं पुरा ॥ १०८ ॥

अश्वरूपं तमालोक्य व्यथमाना रथाङ्गिणा ।
आदिष्टा स्पष्टमेवायं भर्ता ते भवितेत्यहम् ॥ १०९ ॥

कान्तेन सह यान्तीं मामेकदा शोकविह्वलाम् ।
आह्लादयन्महाश्वेता निजवृत्तान्तविस्तरैः ॥ ११० ॥

तयोक्तः स युवाप्येनं निवेदयितुमात्मनः ।
चरित्रं कथयांचक्रे ततः कादम्बरीकथाम् ॥ १११ ॥

अस्मिन् विन्ध्यवने वृद्धशल्मलिद्रुमवर्तिनोः ।
उत्पन्नः शुकदम्पत्योरेक एवास्मि शावकः ॥ ११२ ॥

बाल्ये मृता सवित्री मे मत्पोषणपरायणे ।
किरातप्रहते ताते परासावपतं द्रुमात् ॥ ११३ ॥

नीत्वा मुनिकुमारेण स्वाश्रमं विश्रमीकृतम् ।
जाबालिमुनिरालोच्य स्मित्वा मामभ्यभाषत ॥ ११४ ॥

अवन्तिष्वभवद्भूपस्तारापीड इति श्रुतः ।
पुत्रः क्षत्रकुलापीडश्चन्द्रापीडस्ततोऽभवत् ॥ ११५ ॥

मन्त्रिणः शुकनासस्य वैशम्पायन इत्यभूत् ।
तौ बहिर्नगरं गत्वा विद्यापारमपश्यताम् ॥ ११६ ॥

विद्यान्ते षोडशे वर्षे चन्द्रापीडं नराधिपः ।
आनीयेन्द्रायुधं दत्त्वा यौवराज्येऽभिषेचयत् ॥ ११७ ॥

दिग्जयाय ततो गत्वा हिमवत्पार्श्ववर्तिनि ।
सवैशम्पायने सैन्ये किन्नरद्वयमन्वगात् ॥ ११८ ॥

इन्द्रायुधजवाद्दूरं गत्वाच्छोदसरस्तटे ।
गीतानुसारी गत्वासावद्राक्षीद्दिव्ययोषितम् ॥ ११९ ॥

तयोपचरितः सर्वं व्यावर्ण्य चरितं निजम् ।
तद्वृत्तान्तमथापृच्छन्निश्वस्याभिदधे च सा ॥ १२० ॥

महाश्वेतेतिनामाहं गन्धर्वाधिपतेः सुता ।
सात्वहं पुण्डरीकाह्वे भाववत्यभवं द्विजे ॥ १२१ ॥

चन्द्रोदये सुदुर्वारं स्मरसागरमुद्वहन् ।
जहौ प्राणान् घृणाहीना विललापास्मि केवलम् ॥ १२२ ॥

पुरुषस्तं जहारैकश्चन्द्रमण्डलनिर्गतः ।
वत्से मनोरथप्राप्तिर्भवितेत्यभिधाय माम् ॥ १२३ ॥

कपिञ्जलः सखा तस्य द्रुतमेव तदन्वयात् ।
अहं पुनरिहैवास इत्यस्रायत सा भृशम् ॥ १२४ ॥

तारा........तया सार्धं गत्वा गन्धर्वकन्यकाम् ।
कादम्बरीं ददर्शाथ प्रेमव्याकिरभूत्तयोः ॥ १२५ ॥

परेद्युः शिबिरं गत्वा सत्वरं पितुराज्ञया ।
ताम्बूलदायिकां दत्वा कादम्बर्यै गृहं ययौ ॥ १२६ ॥

ततः कदाचिदापेदे कादम्बर्याः समीपतः ।
पत्रलेखाथ सैकान्ते तद्वृत्तान्तमवर्णयत् ॥ १२७ ॥

अभूतपूर्वामन्यत्र प्रेयस्याः स्मरविक्रियाम् ।
आकर्ण्य तां स्मरन् कान्तां मुहुर्मोहमगादसौ ॥ १२८ ॥

कटकक्षोभकर्तारं श्रुत्वा हेमजटेश्वरम् ।
कुमारे गन्तुमारब्धेऽपतत्पुष्पपथाद्रथः ॥ १२९ ॥

श्रुत्वा चित्ररथप्रेष्यात्कादम्बर्याः स्वयंवरम् ।
तदेव रथमारुह्य प्रहृष्टैर्गुरुभिः सह ॥ १३० ॥

स्कन्धावारं ततो गत्वा चन्द्रापीडः ससैनिकः ।
सवैशम्पायनस्तूर्णं गन्धर्वनगरं ययौ ॥ १३१ ॥

ततस्तस्योरसि स्नेहात् परिहृत्य सुरासुरान् ।
चक्रे चैत्ररथी तत्र श्लाघ्यां सन्तानकस्रजम् ॥ १३२ ॥

स्वयंवरे कृते युद्धे श्रुत्वा मन्त्रिसुतं हतम् ।
बद्धरागा महाश्वेता चुक्रोश भृशदुःखिता ॥ १३३ ॥

अपापामसतीं बुद्ध्वा शशाप कुपितः पिता ।
चण्डालयोनिं गच्छेति सद्यः सात्रपतन्मृता ॥ १३४ ॥

स वैशम्पायनस्तस्या दर्शनात्पूर्वजन्मनः ।
स्मरन्निवृत्तः समरात्तां निशम्याजहादसून् ॥ १३५ ॥

चन्द्रापीडेन देव्या च कादम्बर्या तथापरैः ।
प्रायोपवेशमारब्धं वारयन्नारदोऽब्रवीत् ॥ १३६ ॥

श्रूयतां पुण्डरीकोऽसौ ध्वस्तः कुसुमधन्वना ।
रूपाभिमानी मात्सर्यान्महाश्वेतानिमित्ततः ॥ १३७ ॥

जहार चन्द्रस्तत्कायं सखायं च कपिञ्जलः ।
मर्त्यो भवेति शप्तारं शशापेन्दुरिति क्रुधा ॥ १३८ ॥

दुर्गेषु प्रभ्रमेत्युक्तश्चन्द्रापीडात्मना स्थितम् ।
कपिञ्जलस्तमेवास्मिन्नश्वो भूत्वानुवर्तते ॥ १३९ ॥

वैशम्पायन इत्यास्मिन् भूत्वा चित्तभुवैव सः ।
पुण्डरीको हतः शप्ता वृथा चेयं तपस्विनी ॥ १४० ॥

तद्भवन्तः प्रतीक्षन्तां कञ्चित्कालमिति ब्रुवन् ।
तिरोभून्नारदस्तेऽमी शोकव्याकुलमासते ॥ १४१ ॥

स वैशम्पायनः पश्चात् तिरश्चीं जातिमाश्रितः ।
महाश्वेतापि मातङ्गीं प्राप्ता जातिं...... ॥ १४२ ॥

इत्युक्त्वा स्मृतजातिं मां निनीषुः शिष्यमभ्ययात् ।
सोऽयं चण्डालकन्यायै दीयतामभिधीयताम् ॥ १४३ ॥

स्मरायते महाश्वेते मनोरथशतार्थितः ।
सोऽयं मालवराजाय शूद्रकाय निवेद्यताम् ॥ १४४ ॥

तत्राभीष्टभवित्री वां स राजा नन्दिकेश्वरः ।
भवानीशापतो जातश्चीभिश्चतसृभिः सह ॥ १४५ ॥

जिगीषाग्राहमुत्सृज्य त्रिवर्गेष्वपराङ्मुखः ।
स चन्द्रापीडचरितश्रवणेन भविष्यति ॥ १४६ ॥

इत्युक्ते तेन तां नीतस्तया चापि नृपान्तिकम् ।
तत्राकथयदात्मीयां कथां तदनुयोगतः ॥ १४७ ॥

ततः शशिकरानीतं स्वशरीरमशिश्रयत् ।
महाश्वेताशरीरं च रक्षितं सोमरश्मिभिः ॥ १४८ ॥

अवतारितमारूढा तं देहमपहाय सा ।
तावावां मुक्तसंक्लेशौ त्वामेव द्रष्टुमागतौ ॥ १४९ ॥

इत्याकर्ण्य...., तस्मिन् द्वन्द्वेऽभिवन्दितुम् ।
मुकुन्दचरणद्वन्द्वं प्राप्तां मामित्युवाच सः ॥ १५० ॥

वत्से माभूद्विषादस्ते सम्पन्नस्ते मनोरथः ।
दिव्यरूपं पुरेव त्वं भर्तारमनुवर्तसे ॥ १५१ ॥

साम्बो मम सुतः क्रीडन् जरितारिमृषिं पुरा ।
हंसाकुला सरस्तोये क्रीडन्तं बिसतन्तुना ॥ १५२ ॥

शप्तो निगळयित्वासौ मुनिना जनान्तरे ।
निगळस्पर्शि मद्वत्से चरणद्वन्द्वमस्त्विति ॥ १५३ ॥

स राजवाहनो नाम भूत्वा दैत्यविपत्तये ।
भर्तारं तव दुःखार्तं मर्त्यत्वान्मोचयिष्यति ॥ १५४ ॥

बहूनां जन्मनामन्ते तत्सहायः स ते पतिः ।
अग्निवर्णरथप्राप्त्या भवेदग्निरथाह्वयः ॥ १५५ ॥

अवन्तिसुन्दरीत्यास्ते यज्वयपि तत्प्रिया ।
ललामश्रीरिति स्त्रीणामवन्तिनृपतेः सुता ॥ १५६ ॥

अयं चूडामणिस्तस्मै कुमाराय प्रदीयताम् ।
नैव स्यान्मानुषादेषा यस्मिन् मौलिगते नृणाम् ॥ १५७ ॥

इत्युक्त्वा हरिणा साहं प्रयागत्य पुरीमिमाम् ।
उत्तारिता वसन्तीह त्वयैव यदनुगृह्णताम् ॥ १५८ ॥

इत्युक्त्वा तं मणिशफरकाद्रत्नमुद्धृत्य धाम्ना
नक्षत्राणां द्युमणिमकरोन्मण्डनं तच्छिखण्डे ।
यत्रामुक्ते नरकभिदुरः कौस्तुभस्येव भासा
दीप्तस्येन्दोः शिर इव हरस्याङ्गमस्यावभासे ॥ १५९ ॥

हृदयमेत्य सविभ्रमहाविल-
म्भित स विस्मरणाख्य महाबिलम् ।
नतमियेष रिपून्त महाविल-
म्बितमयं च विहाय महाबिलम् ॥ १६० ॥

अथापृच्छ्य प्रीत्या वरवति गते तत्र मिथुने
पृथग्भूय प्राया दुदधिसदृशो दैत्यविवरात् ।
कुमारः प्रीतात्मा जगति जनितानन्दमुदयी
चरान्मित्रान्वेषी दिवमिव शशी मालवपुरीम् ॥ १६१ ॥

॥ इत्यवन्तिसुन्दरीकथासारे पञ्चमः परिच्छेदः ॥

# अथ षष्ठः परिच्छेदः ॥

अथासौ पथि गच्छन्तं पुरुषं नगराद्बहिः ।
जद्राक्षीत्संनिकृष्यासौ मित्रं पुष्पोद्भवोऽभवत् ॥ १ ॥

स जहर्ष तथोदन्वानिन्दौ तद्दर्शने यथा ।
कुमारः परिरभ्यैनं पप्रच्छ सुहृदां गतिम् ॥ २ ॥

ततो बद्धाञ्जलिः सर्वानुक्त्वा कुशलिनः सर्वान् ।
स कथामित्थमारेभे विचित्रं वक्तुमात्मनः ॥ ३ ॥

देव त्वय्यनिमित्तेन प्रलीने दीनमानसाः ।
मत्वा बिलगतं कृत्वा तद्द्वारे देवरक्षितम् ॥ ४ ॥

यथा प्रवेशं निर्याणं नैवस्याद्बिलवासिनाम् ।
इत्यालोच्य वयं सर्वे प्राद्रवाम दिशो दश ॥ ५ ॥

संवत्सरान्ते चम्पायां सङ्गमः समयश्च नः ।
सोऽप्यहं विन्ध्यशैलस्य पश्चिमं भागमभ्यगाम् ॥ ६ ॥

तत्रैकं पुरुषं वप्रात्पतन्तं पश्यतो मम ।
आसीन्मनसि निर्वेदाद्बाढ्यं प्राणमुचामुना ॥ ७ ॥

शक्यं गगन एवैनं गृहीत्वा परिरक्षितुम् ।
शोकहेतुं तथा हर्तुं यावत्सामर्थ्यमुत्सहे ॥ ८ ॥

इत्याकलय्य सयत्नं दोर्भ्यामालिङ्ग्य धारयन् ।
तालवृन्तानिलाम्भोभिर्जातप्राणमभाणिषम् ॥ ९ ॥

भद्र कस्तव निर्वेदो यत्प्राणव्ययकारणम् ।
इत्युक्तः स तु सस्नेहं मामालोक्येदमभ्यधात् ॥ १० ॥

कृतं तात न साध्वेतद्बद्धदेहस्य रक्षणम् ।
मयापि श्रुतिशास्त्राणां कियानपि कृतः श्रमः ॥ ११ ॥

किं तेनापजहारैकं दयिताविरहज्वरः ।
तदहो बलवानेष स्नेहः किं न करोत्यसौ ॥ १२ ॥

तथा हीन्दुमतीहेतोरजः प्राणैर्व्ययूयुजत् ।
प्रमद्वरायै रुरुणाप्यायुषोऽर्धमदापयत् ॥ १३ ॥

बद्धाः सर्वाभिभाविन्या स्नेहशृंखलयानया ।
कुशीकृताः कियन्तो वै महान्तो मयि का कथा ॥ १४ ॥

कोवाऽस्याश्चरितं वक्तुं शक्तः कल्पशतैरपि ।
हस्तग्राह्याण्यसावस्मिन् प्रायो मुक्तिफलान्यपि ॥ १५ ॥

इत्युद्वेगवचः श्रुत्वा महतीयमहो व्यथा ।
कस्य हेतोरपीत्यस्मिन् प्रतीतं पितरीव मे ॥ १६ ॥

इत्येवं चिन्तयित्वैका जरती पुर एव नौ ।
क्रोशन्ती चरणाभ्याशं गत्वा सत्वरमब्रवीत् ॥ १७ ॥

परित्रायध्वमत्रैषा तरुणी बहुविह्वला ।
सुखोचिता चितारूढेत्याकर्ण्याभ्यपताव ताम् ॥ १८ ॥

तथावस्थान्वितां कूटादाहृत्य शिशिरे क्वचित् ।
चिरं निरूप्य सैवेयं सुव्रतेत्यब्रवीत् स ताम् ॥ १९ ॥

अथोत्तस्थौ तयोस्तमिन्नतर्क्यः तदवस्थयोः ।
विरहानलमुद्वेलं प्रसह्य प्रीतिसागरम् ॥ २० ॥

ससंभ्रमान्ते सन्तापे शान्ते माभित्यभाषत ।
भद्र भद्रः प्रयासस्ते फलितः श्रूयतां कथा ॥ २१ ॥

भद्रोद्भवस्य नामाहं पुत्रो भूत्वा वणिक्पतेः ।
समुद्रयात्री नष्टार्थो नाविद्वीपान्तरं गतः ॥ २२ ॥

तत्रैनामुपलभ्यास्य जन्मनि प्रियया तया ।
रममाणश्चिरायास्या वसामि स्म पितुर्गृहे ॥ २३ ॥

श्रुत्वा पुष्पपुरीवार्तां तत्रागन्तोः कुतश्चन ।
उदारं नावमारुह्य प्रायां बन्धुदिदृक्षया ॥ २४ ॥

घोरमारुतभग्नायां मग्नायां नावि नाविकैः ।
दुर्दिनाश्रितदिग्भागैर्मग्नमग्नोऽस्मि चार्णवे ॥ २५ ॥

अनया च सहापन्नजरत्या मातरं तिरनाम् ।
तं पोतलवमालम्ब्य प्लवमानामलक्षयम् ॥ २६ ॥

अमूभ्यां लहरीवेगाद्दूरीभूतान्तरेऽचिरात् ।
आलिलम्बिषमाणे मय्यतीतं दृष्टिगोचरम् ॥ २७ ॥

कं न निःस्नेहयत्याशा यतोऽहं तदवस्थया ।
वियुक्तोऽप्यनया देहं नाजहां जीवनाशया ॥ २८ ॥

मयात्र प्लवमानेन मत्स्यपृष्ठाधिरोहिणा ।
दैवाद्द्वीपान्तरं गत्वा तस्मिन्नेकाकिनोषितम् ॥ २९ ॥

आनीये नाविकेन स्वं पोतमारोप्य केनचित् ।
कालिद्वीपं ततः सर्वामुर्वीमन्विष्टवानिमाम् ॥ ३० ॥
शरदः षोडशान्विष्य ग्रामं ग्रामं वनं वनम् ।
पुरं पुरं च नैराश्याद् भृगौ देहमपातयम् ॥ ३१ ॥
रक्षितोऽस्मि त्वया सेयं दृष्टा गर्भस्य का कथा ।
इत्याकुलेऽस्मिन्युक्ते जगाद जरती च सा ॥ ३२ ॥
वत्स मद्दुहितेयं त्वद्विरहेण जहात्यसून् ।
कथमप्यर्णवोत्तीर्णा प्रासूत तनयं वने ॥ ३३ ॥
वृक्षे सत्त्वभिया बालमालम्ब्यार्म्भ निचिन्वती ।
महिषाभिहताबोधं गता सा बोधिता चिरात् ॥ ३४ ॥
दृष्ट्वा द्विजवरं कंचित् सबालं व्याकुलीकृता ।
आनीये तेन यत्रासावास प्रसवविह्वला ॥ ३५ ॥

दुःखार्ता तदवस्थां मामालोक्य व्यथिता भृशम् ।
अदृष्ट्वा च सुतं मत्तः प्राणांस्त्यक्तुमियमुद्यता ॥ ३६ ॥

संस्तभ्यैनां मुनिर्वाग्भिः कल्यां कृत्वौषधैश्च माम् ।
स जगाम चिरं स्थित्वा विद्यार्थी रुचितां दिशम् ॥ ३७ ॥

मुनेरनुव्याहरणात् पुरावां हंसरूपयोः ।
विरहः षोडशाब्दानां विगमे च समागमः ॥ ३८ ॥

चक्रवर्तिसखः सूनुर्भावीति त्वदुदीरितम् ।
स्मारयन्त्या मयाचैषा शरदः षोडशात्ययात् ॥ ३९ ॥

साद्य त्वद्दर्शनालाभान्निराशा विवशा वने ।
चितारूढा वराकीति ब्रुवत्येव रुरोद सा ॥ ४० ॥

अथाकथयमित्थं वां पुत्रवार्ता निशम्यताम् ।
स तस्मिन् महिषं हत्वा कुमारः करिणा हृतः ॥ ४१ ॥

सिंहभीत्या द्विपोत्क्षिप्तः कपिनोत्क्षिप्य पातितः ।
येन व्यवहरत्येषा जने तत्पुष्पभाजने ॥ ४२ ॥

स तं गृहीत्वा जीवन्तं निरसंज्ञोऽयमिति क्षणात् ।
अदृष्ट्वा जननीं निन्ये वामदेवाश्रमं मुनिः ॥ ४३ ॥

वसुमत्या सहामात्यैर्वसतः पितुराश्रमे ।
सकाशं राजहंसस्याध्यनायि सततोऽमुना ॥ ४४ ॥

वर्धितस्तेन भूभर्त्रा सुमत्यादिसुतैः सह ।
दिग्जयायाद्य गच्छन्तं राजवाहनमन्वयात् ॥ ४५ ॥

तस्मिन् बिलगते देवे तमन्विष्य भ्रमन्वने ।
पित्रोर्वां पादयोर्वर्ते पुत्रः पुष्पोद्भवोऽग्रसौ ॥ ४६ ॥

इत्युदीर्य ताः पित्रोर्मज्जन् हर्षाश्रुनिर्झरे ।
सद्दानन्दमयं ताभ्यां सञ्चरन् नन्दिना वने ॥ ४७ ॥

अर्थसाध्यां तयोर्वृत्तिं मत्वार्थोपायचिन्तया ।
श्रीमण्डलमथालिख्य हुत्वाग्निं विजने वने ॥ ४८ ॥

प्रारेहप्रतिमा प्राणिक्षतगण्ड ।शिलादिभिः ।
अ ग्रक्षितनिधौ देशे विविधैर्निधिलक्षणैः ॥ ४९ ॥

साधनैर्वर्तिकाभिश्च प्रत्यूहशमनैर्जपैः ।
यथाविध्यहमारभ्य प्रकृष्टं वसु दृष्टवान् ॥ ५० ॥

तावद्दूरयुहते सार्थे साहाय्यं कुर्वता मम ।
सार्थवाहेन तत्रासीत्सख्यं सवयसा सह ॥ ५१ ॥

भग्ने दस्युगणे शक्तिष्वारोप्य प्रचुरं धनम् ।
सार्थेन सह संप्राप्ता विशालां नगरीं वयम् ॥ ५२ ॥

सार्थवाहगृहं प्राप्तेष्वस्मासु सुहृदः पिता ।
प्रागेव श्रुतवृत्तान्तः पुत्रवन्मामपूजयत् ॥ ५३ ॥

अन्येद्युः पितृसत्सामा स्वसुतां बालचन्द्रिकाम् ।
आजुहाव ततस्तस्मिन् उत्रोत्सामहमभूत्त्वग्रम् ॥ ५४ ॥

लावण्याम्बुमयी गात्रे कालकूटमयी दृशोः ।
लीलामयी पदन्यासे सा कन्या समदृश्यत ॥ ५५ ॥

तत्रस्थानां च सोत्साहं निपेतुर्बहवो दृशः ।
तस्यां मयि च सारूप्यं कुसुमेष्वोरिवेषवः ॥ ५६ ॥

तस्यां गतायामेकान्ते सार्थवाहः स मे सखा ।
अवोचन्मां तु विज्ञाय त्वदन्वेषणतत्परम् ॥ ५७ ॥

श्रूयतां गुह्यचामुण्डा चण्डी वामदेवतास्मसु ।
अधीनवान् जलाद्येषु शकुनेषु चतुर्ष्वहम् ॥ ५८ ॥

श्रोत्रपङ्क्तिरुपकान्तैरेभिर्भव्यात्मसंसिभिः ।
राजवाहनमन्वेष्टुं परीक्ष्य प्रयतावहे ॥ ५९ ॥

इति श्रुत्वा परीक्ष्यैतदुपश्रुत्याद्यनुक्रमात् ।
तदानुगुण्यसन्तुष्टस्त्वितोऽहं सुहृदा सह ॥ ६० ॥
स्मरज्वरविनोदाय क्रीडानलिनकं गतः ।
अदूरे गिरमश्रौषं हा हाहेति ततस्ततः ॥ ६१ ॥
त्वरितोपसृतः कान्तामद्राक्षं बालचन्द्रिकाम् ।
अक्षिपत्राशमप्राक्षं किमित्युद्रुन्धनोन्मुखी ॥ ६२ ॥
प्रत्यभिज्ञाय मा बाला निगृह्यावदधेऽत्रपाम् ।
दयित श्रूयतामत्र यत्प्राणव्यय कारणम् ॥ ६३ ॥
इहाम्बुविहृतिव्याजान्महासेनसुता हृता ।
ततः प्रभृति कन्याभिर्जलक्रीडा न लभ्यते ॥ ६४ ॥
सख्यास्त्ववन्तिसुन्दर्याः क्रीडादर्शनदोहलम्
राज्ञो विज्ञापयिष्यन्ती स्वयमेवाहमभ्ययाम् ॥ ६५ ॥
चण्डवर्मानुजेनाहं दृष्टा दारुणवर्मणा ।
तस्याप्रियभिया तस्मै पितृभ्यां चास्मि दित्सिता ॥ ६६ ॥
तदहं मृत्यवे दातुमात्मानामियमारभे ।
इत्थं भूयोऽपि तत्कर्तुं प्रवृत्तामित्यभाणिषम् ॥ ६७ ॥
प्रिये मैवं दुरात्मासावुपायेन निहन्यताम् ।
त्वदन्तरङ्गभूता ते ब्रवीतु पितरौ सखी ॥ ६८ ॥
व्यक्तं देवतयाविष्टा कयाचिद् बालचन्द्रिका ।
सा किलातुल्यजातीयं प्रदहेदनलस्पृशम् ॥ ६९ ॥
इत्यनेनैव मूढात्मा न चेदेष विरंस्यति ।
सैव ब्रवीतु कन्येयं नेया तद्गृहमन्यथा ॥ ७० ॥
तस्मिन् देवतया ध्वस्ते स्वजनो विक्रियेत वा ।
तथेति च ततः पित्रा नीतायां त्वयि तद्गृहम् ॥ ७१ ॥

स्त्रीभूत्वैनं दुरात्मानं हनिष्यामि रहस्यहम् ।
इत्युक्तोपगमय्यैनां सख्या च समशंस्यहम् ॥ ७२ ॥

सा मयोक्तं तथा चक्रे मदनार्तः स दुर्मतिः ।
अन्वबध्नात् प्रियां पित्रा नीता तद्गृहमेव सा ॥ ७३ ॥

तत्सखी नाम भूत्वाहं नारीनैपथ्यकर्मणा ।
अभ्यन्तरं प्रविश्यैनं मर्माघातैरमारयम् ॥ ७४ ॥

स दैवतहतः पापः कन्यादूषक इत्यलम् ।
ख्याते जगति सौहार्दात्कन्या मह्यमदीयत ॥ ७५ ॥

इत्यानुषङ्गिकां प्राप्य त्वदन्वेषणकारणम् ।
उद्यतस्यास्य लब्धं मे दैवदर्शनदौहृदम् ॥ ७६ ॥

इत्थं निशम्य दिष्ट्या मे दृष्टौ नः पितराविति ।
कुमारे कथयत्येनं परीयुर्गुरवश्च ते ॥ ७७ ॥

यथार्हमभिवन्द्याथ श्वशुरौ पितरावपि ।
कुमारः सहितैः प्रीतः स्यन्दनेनाविशत्पुरीम् ॥ ७८ ॥

स तां सतां जन्मभूमिं सम्पदां सम्पदास्पदम् ।
जगामोज्जयिनीमुर्व्या ललामश्रियमुज्ज्वलाम् ॥ ७९ ॥

तत्रोपचरितं रम्यं रत्नोद्भवगृहं गतः ।
पुरुषान् सुहृदोऽन्वेष्टुं विससर्ज नृपात्मजः ॥ ८० ॥

ततः कदाचिदाचख्यौ बालचन्द्रिकया सह ।
पुष्पोद्भवस्ते दासीयं संदिष्टा राजकन्यया ॥ ८१ ॥

ममास्मिन्नारदारब्धे भाविन्युदकदानिते ।
उत्सवे तव सान्निध्यं भर्त्रा सह भवत्विति ॥ ८२ ॥

तदनुज्ञाय रम्या स राजपुत्रीति मे श्रुतिः ।
पतिं चेति ब्रुवाणं सा भणति स्म नृपात्मजम् ॥ ८३ ॥

ततोऽपि रमणीया सा न दृष्टा सृष्टिरीदृशी ।
ततस्तामादिशद्भर्ता तद्रूपालेख्यकर्मणि ॥ ८४ ॥

तया न शक्यमित्युक्ते कुमारः कन्यकाकृतिम् ।
ज्ञास्यन् यज्ञवतीरूपं लिलेख फलके क्वचित् ॥ ८५ ॥

दृष्ट्वा पुष्पोद्भवे चित्तं चिन्तयाविष्टचेतसि ।
स्मित्वा विस्मयमाना सा बभाषे बालचन्द्रिका ॥ ८६ ॥

अशक्यारम्भपक्षे यन्मया रूपनिरूपितम् ।
तत्तथैवेदमापन्नमुत्कण्ठा त्वत्र भिद्यते ॥ ८७ ॥

आकर्ण्याकृतिसंवादमुक्त्वा यज्ञवतीति ताम् ।
कुमारं स्वैरमातस्थे तत्रेत्थं कथयानया ॥ ८८ ॥

अथ द्वित्रिदिनापाये कुमारं बालचन्द्रिका ।
सचित्रफलकागत्य प्रियोपान्ते व्यजिज्ञपत् ॥ ८९ ॥

तदाकृत्यविसंवादा वेत्तुं तच्चित्रकर्मया ।
निन्ये कन्यापुरं दृष्ट्वा व्यस्मैष्ट च सखीजनः ॥ ९० ॥

सविक्रियं मृगाक्षी तं निरीक्ष्य स्मरमन्धरम् ।
लिलेख तत्र तद्रूपं कुमारान्नैव भिद्यते ॥ ९१ ॥

इत्यर्पितं निरूप्यैताद्विस्मितास्तिमितेक्षणः ।
पुष्पोद्भवसुहृद्रूपान्न बिभेद तदाभिदा ॥ ९२ ॥

राजपुत्रोऽपि मन्ये सा स्मरत्वेवान्यजन्मनः ।
अन्यथा कथमित्थं मद्रूपसिद्धिरिति स्वयम् ॥ ९३ ॥

चिन्तयित्वा चिरं भूयः सुहृदा सह तद्गृहे ।
नीत्वा गृहं दिदिक्षुस्तां निनाय क्षणदामपि ॥ ९४ ॥

अपरेद्युः सहस्रार्चिष्युदयाचलचुम्बिनि ।
समाविष्टोत्सवं द्रष्टुं ससुहृद्राजवाहनः ॥ ९५ ॥

निष्क्रम्य नगरद्वारा सिप्रावप्रगतो ययौ ।
पश्यन् पौरजनारब्धं तस्मिन्नुत्सवसंकुलम् ॥ ९६ ॥

(तरन्नु) ज्जयिनीं रम्यां वीक्ष्यमाणः क्रमेण सः ।
बाह्योद्यानानि रम्याणि क्रीडास्थानमथायतम् ॥ ९७ ॥

देवस्थानतटाकस्य निष्कुटे तटवर्तिनि ।
कन्यापरिजनस्त्रीणां ददर्श विहृतिक्रियाः ॥ ९८ ॥

कन्दुकेन विभिश्चारै रत्नैरपि च षड्विधैः ।
चित्रदुष्करमार्गेषु क्रीडन्तीरपराः स्त्रियः ॥ ९९ ॥

पाञ्चालिकादिकङ्केलिरत्नच्छेद्यानि चापराः ।
दुर्वाचकानि कुर्वन्तीरष्टादशविधान्यपि ॥ १०० ॥

लिपिभेदांश्च सिन्ध्वादीन् काश्चिन्म्लेच्छाक्षराणि च ।
प्रहेळिकादिका वाचः पराश्च परिचिन्वतीः ॥ १०१ ॥

सङ्गीतगीतवादित्राण्यभ्यस्यन्तीरनेकशः ।
तस्मिन्नवन्तिसुन्दर्या ददर्श परिचारिकाः ॥ १०२ ॥

अवतीर्य रथात्तासामभिरामैः क्रियान्तरैः ।
विलासैर्विस्मितस्तस्मिन्नुद्याने निषसाद सः ॥ १०३ ॥

विचित्रपुष्पोपहारे निषण्णः पुष्पमण्डपे ।
बभाषे दयितोपान्ते कुमारं बालचन्द्रिका ॥ १०४ ॥

प्रबुद्धपद्मगन्धाढ्या वार्धिस्पर्धिजलश्रियः ।
देवस्थानतटाकस्य प्रेक्ष्यन्तां देव सम्पदः ॥ १०५ ॥

दीव्यन्मन्दोदकानीति प्रायो दिव्यसरांस्ययम् ।
अवन्तिपुरमाश्रित्य क्षितीश इव तिष्ठति ॥ १०६ ॥

नौविमानान्यमून्यस्मिन् संचरन्ति सहस्रशः ।
देवता इव दीव्यन्ति प्रीतास्तेषु पुरन्ध्रयः ॥ १०७ ॥

इत्यस्मिन्नन्तरे सार्द्रः सौरभातिशयोऽभवत् ।
तमाघ्रायाबला चेत्थं व्याकुला बालचन्द्रिका ॥ १०८ ॥

योसावुदकसंचारी प्रासादः स्फटिकोज्ज्वलः
रजताद्रिसमः श्रीमानत्रास्ते राजकन्यका ॥ १०९ ॥

तावता शुश्रुवे युक्तः श्रावकत्वादिषड्गुणैः ।
काक्यादिदोषैरस्पृष्टः स्पष्टो (ष्ट) द्वाविंशतिश्रुतिः ॥ ११० ॥

द्विग्रामयोनिस्त्रिस्थानः सप्तस्वरसमुद्भवः ।
द्विसप्तमूर्च्छनायुक्तः स्वष्टादशसजातिकः ॥ १११ ॥

मा(ता)नैश्च कर(णैः)गीता.............त्रिपूर्तिकः ।
षोडशालंकृतिस्तालैर्विंशत्या च समन्वितः ॥ ११२ ॥

हृद्यगीतध्वनिश्चित्राण्यातोद्यानि च सस्वनुः ।
वेणुर्मृदङ्गवाद्यानि रेणुर्भूषणराशयः ॥ ११३ ॥

प्रकीर्णकप्रभृत्यष्टभेदैर्बन्धननै या (?) ।
विचित्रनृत्ताभिनया बभूवुः पुरयोषितः ॥ ११४ ॥

प्रहृष्टनरनारीकनौविमानशतैर्वृतः ।
आससाद च तं देशं प्रासादः प्रमदामयी (यः) ॥ ११५ ॥

तरन्तीमिव तन्मध्ये स्वलावण्योदयाम्बुधौ ।
इन्दुमण्डलनिष्यन्दधारामिव निरन्तराम् ॥ ११६ ॥

केशेषु कृष्णां चरिते सुभद्रां चित्राङ्गदां दोष्णि च वाचि सत्याम् ।
वर्णे च गौरीं सरसां सखीषु वर्णोत्तमस्त्रीसहितामित्राङ्गे ॥ ११७ ॥

अचिन्त्यरूपरूपां तामवन्तिनृपतेः सुताम् ।
अवन्तिसुन्दरीं दृष्ट्वा कुमारः परिषस्वजे ॥ ११८ ॥

पूर्वजन्मप्रियामेनां जानन्नपि नृपात्मजः ।
धैर्यराशिरनाश्लिष्यन्नतिष्ठत्कथमप्यसौ ॥ ११९ ॥

सापि जन्मान्तरस्मृत्या दूत्येव दृढमाप्तया ।
प्रेर्यमाणापि धैर्येण प्रत्युत्थानादि नाकरोत् ॥ १२० ॥
जृंभितोत्कम्परोमाश्रस्वेदश्वासादिविक्रियाम् ।
दृष्ट्वा तां क्षणनिष्पन्दां ववन्दे बालचन्द्रिका ॥ १२१ ॥

उत्थाय परिरभ्यैनमन्यव्याजान्नृपात्मजम् ।
सविभ्रमं प्रणम्योर्व्यां निषसाद नृपात्मजा ॥ १२२ ॥

स राजवाहनं पश्यन् सर्व एवाङ्गनाजनः
पुष्पधन्वानमेवैनं मूर्तिमन्तममन्यत ॥ १२३ ॥

वसुमत्यामयं जातो राजहंसान्महीपतेः ।
येन त्वं लिखिता...त्याचख्ये बालचन्द्रिका ॥ १२४ ॥

तयोरनङ्गसङ्गीतभङ्गीरङ्गायितात्मनोः ।
विकारा विविधाकारा बभूवु र्णे ॥ १२५ ॥

(परिहा)सप्रसङ्गेन व्याजहार नृपात्मजः ।
न पीडनीयाश्चक्राङ्गास्तथा हि श्रूयतां कथा ॥ १२६ ॥

आसीत्कंसरिपोः पुत्रः साम्ब इत्यस्य वल्लभा ।
अभूत्त्रिभुवनस्त्रीणां भूषणं भौमनन्दना ॥ १२७ ॥

स तया समनिर्वी . . . . . न्मना ।
. . . . मुनेः शापान्मानुषत्वमभूत्तयोः ॥ १२८ ॥

अभिन्नरूपतां तत्र स्मरणं दर्शनं तयोः ।
अल्प . . . . . . . . . . . . ॥ १२९ ॥

(साम्बस्य) वल्लभाप्येवं यज्ञवत्यपि तत्फलम् ।
भुङ्क्त एव तथाभूतेत्यतिगम्भीरमभ्यधात् ॥ १३० ॥

ततोऽस्य .. . . . . . . . . . ।
. . . . . . . . . . . . नृपकन्यका ॥ १३१ ॥

तया चिक्षीयमाणः स प्रवृत्या नृपनन्दनः ।
चकाराभ्यवहारा(दि)श्चाभि . . . . ॥ १३२ ॥

. . . . . . नुरक्ते दिनश्रिया ।
विहर्तुमिव मार्ताण्डेऽप्यवतीर्णोऽपरार्णवम् ॥ १३३ ॥

क्रमेण तरुणीभूते तमसि ग्रह................ ।
......म्बरं चन्द्रेऽप्यैन्द्रीवदनचुम्बिनि ॥ १३४ ॥

प्रदोषसमये प्राप्ते निवृत्ते जनसंकुले ।
कथमप्य(पहायैनां कुमारः प्राविशत्) गृहम् ॥ १३५ ॥

चक्रे शय्यागतश्चिन्तां चिरदृष्टापि मे प्रिया ।
न (पृष्टा) कुशलं कष्टं दूरे कण्ठग्रहादयः ॥ १३६ ॥

सा राजकन्या संप्राप्ता वय(मप्येवमास्महे)
(असह्यः का)मसन्तापः किमत्र करवाण्यहम् । ॥ १३७ ॥

अदत्तां गुरुभिः कान्तामदृष्ट्वा च पुरोधसम् ।
न शक्यं परिणेतुं तत्सर्वथा दुर्वहो भरः ॥ १३८ ॥

चिन्तयन्तममुं दृष्ट्वा सन्तप्तेव ततो गता ।
अवश्यायाश्रु वर्षन्ती नमादिन्दुमुखी निशा ॥ १३९ ॥

मुखमाखण्डलाशाया मण्डयत्यर्कमण्डले ।
प्रभाते सुहृदभ्येत्य व्याजह्रू राजवाहनम् ॥ १४० ॥

देव जागरकारस्ते विकारः किमकारणम् ।
अकस्मादियमङ्गानां कथय क्षामता कथम् ॥ १४१ ॥

इत्युक्तः प्रत्युवाचैनं कुमारः श्रूयतामहम् ।
साम्ब एवास्मि सा कन्या यज्ञवत्येव मे प्रिया ॥ १४२ ॥

अद्यैनामनवद्याङ्गीं प्रसङ्गात्पश्यतः प्रियाम् ।
सुप्तोत्थित इवात्यर्थं जृम्भते मे मनोभवः ॥ १४३ ॥

विसृतात् मृदुवत्तीक्ष्णैर्विशिखैर्निशितं जगत् ।
दुरात्मा कारयत्येवः प्राणिनः किं न सौनकः ॥ १४४ ॥

भ्रूक्षेपवर्ति त्रैलोक्यं कुर्वता क्रूरकर्मणा ।
असंख्याः खण्डितप्राणाः पुण्डरीकादयोऽमुना ॥ १४५ ॥

अनेनैव प्रियाहेतोरत्यर्थं चित्तजन्मना ।
अविषह्यस्मरावस्था वयं चेतः कदर्थिताः ॥ १४६ ॥

करपत्रायते वायुः शि(खि॒)पिविष्टायते शशी ।
रम्यभूतानि वस्तूनि व्यत्यस्तानीव भन्ति मे ॥ १४७ ॥

किं कर्तव्यमिति श्रुत्वा हृष्टः पुष्पोद्भवोऽभ्यधात् ।
सत्यं सर्वे इमे दोषाश्चित्तजन्मनि किन्त्विह ॥ १४८ ॥

श्लाघ्यायां जन्मशीलायां प्रियायां प्रथमं तव ।
युक्तं चित्तभुवारब्धं सदृशस्नेहकारिणा ॥ १४९ ॥

व्यतिरिक्तविकारैव त्वत्तोऽपि नृपकन्यका ।
तदत्राभिमतव्या (प्रा)प्तौ विषादस्तव किंकृतः ॥ १५० ॥

दर्पसारमवज्ञाय स्वसुरस्य परिग्रहः ।
तेजोनुरूपस्तत्सर्वं कल्याणमिव लक्ष्यते ॥ १५१ ॥

इत्यस्मिन्नन्तरे प्राप्ता विविक्ते बालचन्द्रिका ।
आचष्ट कुशलं पृष्टा सप्रत्ययमिदं वचः ॥ १५२ ॥

देवाद्य कुशलं देव्या यथावस्था निशम्यताम् ।
त्वद्दर्शनात्प्रभृत्यस्माद्विरक्ता सर्ववस्तुषु ॥ १५३ ॥

तयाहूता सखीं द्रष्टुं तुङ्गतारणगोपुरम् ।
लक्ष्मीमयमिवाश्चर्यमप्राक्षं नृपतिक्षयम् ॥ १५४ ॥

गत्वाम . . . . रोद्देशं तत्रोद्यानगता गिरः ।
चित्ताः परिजनस्त्रीणामश्रौषं पापशंसिनीः ॥ १५५ ॥

ततः क्रीडासरस्तीरे धारागृहगतां सखीम् ।
अन्यामिव शुचा (शो)च्यामपश्यं नृपकन्यकाम् ॥ १५६ ॥

सा मां समीक्ष्य संभ्रान्ता चिन्ताभारकृशा भृशम् ।
अपृच्छन्मां परिष्वज्य त्वद्वृत्तान्तमनन्तरम् ॥ १५७ ॥

मयोक्तं देवि सोऽप्येवं किमपि व्यक्ताविक्रियः ।
गतायां त्वयि संतापादकरोद्वासरक्रियाम् ॥ १५८ ॥

गते सुहृद्गृहं तस्मिन्नाहूताहमिहागता ।
भद्रे कथमियं जाता त्वदङ्गे कथय व्यथा ॥ १५९ ॥

इति पृष्टा परिष्वज्य प्रेमगाढं चिराय माम् ।
अतिगंभीरमारेभे विविक्ते वक्तुमित्यसौ ॥ १६० ॥

सखि पश्याप्रकाश्येयमावयोः श्रूयतां कथा ।
स एव साम्बः किं गुप्त्या यज्ञवत्येव सास्म्यहम् ॥ १६१ ॥

त्वयापि श्रुतमेवावामेव देवसुरेशयोः ।
जनित्वा मुनिशापेन प्राप्ताथ (प्नुवो) विरहव्यथाम् ॥ १६२ ॥

अहो मे हृदि नैर्घृण्यं यच्चिरोपगते प्रिये ।
नाश्लिष्टं कष्टमौचित्यं चिन्तितं पापया मया ॥ ६३ ॥

इत्यालपन्ती संतापैर्मज्जन्ती मदुरःस्थले ।
मूर्च्छया पतिता भूयः प्रत्याश्वस्येदमभ्यधाम् ॥ १६४ ॥

गच्छ त्वं सखि संतप्तं संतोषविषये त्वदा ।
किं ते जन्मान्तरे प्रेयानचिरादनुभूयताम् ॥ १६५ ॥

अनुरूपवरप्राप्तिः पितृभ्यां तेऽनुमन्यते ।
चण्डवर्मा विरुध्यात्तत् कर्तव्यं(व्यो) गूढसंग्रहः ॥ १३६ ॥

इत्यादि चिरमुक्त्वैनामाश्वास्याहमिहागता ।
दुर्वचा वर्तते तस्या न जाने कीदृशी दशा ॥ १६७ ॥

इति मृदु कथयित्वा लज्जया नम्रवक्त्रां
मृदुतरमभिधाय स्वैरमात्मीयवार्ताम् ॥ १६८ ॥
निपुणमिति कुमारः पूर्वजन्मोचितार्थां
रमयितुमथ ता(गा)थां प्राहिणोत्प्राणनाथान् ॥ १६९ ॥
मरुन्धती स्मरशरपीडितात्मनो·
र्यदाश्रमे तरुणि पुरा व्यद... ....य । ........
..............................
..............................
तदद्य ते हृ(य)दि मदनास्त्रमुद्रितं
मृदुस्मिते लिखिताभिवात्र तिष्ठति (?) ॥ १७० ॥
इत्येनां तदनु विसृज्य सोपचारं
यत्रान्य प्रियजनदर्शनोत्सवोऽभूत्
..............................
..............................
आनन्दस्तिमितमना विनोदनार्थी
तं देशं ससुहृदुपाययौ कुमारः ॥ १७१ ॥

इत्यवन्तिसुन्दरीकथासारे षष्ठः परिच्छेदः ।

---:o:---

# अथ सप्तमः परिच्छेदः ।

---

अथालोक्य द्विजं कञ्चित् प्रद्वारे देवमन्दिरे ।
सज्जं प्रायोपवेशाय प्राप्यैनं तमपृच्छत ॥ १ ॥
अकस्मात्किमयं कायस्त्यज्यते को भवानिति ।
पृष्टः प्रान्तोपविष्टाभ्यां ताभ्यां भूतार्थमभ्यधात् ॥ २ ॥
अग्रहारोऽस्त्यगस्त्याशाभूषणं चोळभूमिषु ।
व्याघ्रग्रामाह्वयः सोऽयं तद्देशाभिजनो जनः ॥ ३ ॥

विप्रो विघ्नेश्वराख्योऽहं (प्राप्य) मन्त्रं कुतोऽप्यहम् ।
गारुडं तेन विद्यार्थी लब्धविद्यालवोऽभवम् ॥ ४ ॥

सर्वेषां पुरुषार्थानामर्थाधीनतया पुनः ।
अशिश्रयममर्यादं राजवेश्म किमप्यहम् ॥ ५ ॥

तत्र क्षुद्रान् पशुप्रायानपश्यं पार्थिवब्रुवान् ।
उपचीयन्त एवैषामधानित्वभिषेक (सेव) ने (?) ॥ ६ ॥

येषां दोषेषु सौहार्दं साहसेषु सहायधीः ।
नयज्ञबुद्धिर्मायाविश्वश्रीर्लोकेषु वाग्मिता ॥ ७ ॥

निर्वेदकरमाचारं दृष्ट्वा तेषां दुरात्मनाम् ।
निवृत्तः सर्वसंसारान्तरणायेदमारभे ॥ ८ ॥

इति श्रुत्वा शुभां वाचं व्याजहार नृपात्मजः ।
सत्यं दुःसह एवासौ पुंसां दुर्जनसङ्गमः ॥ ९ ॥

सन्त्येव भुवि सन्तोऽपि तुल्याः स्वार्थपरार्थयोः ।
सद्भिः सहोपवासोऽपि श्रेयानन्यैः सुखाशनात् ॥ १० ॥

अपनीयायुषि द्वेषं तद्भवाननुयातु नः ।
इति ब्रुवति तत्रैका शिबिका समदृश्यत ॥ ११ ॥

तस्यां वर्षवरप्रायैः स्त्रीजनैर्वृतमान्तिकान् ।
रुजापरीतमेत्याभि सोमदत्तमलक्षयन् ॥ १२ ॥

सोमदत्तः सुहृत्प्रेम्णा स्वस्थीभूतः स तैः सह ।
प्रच्छाये क्वचनासीनो निगूह्य ज्वरवेदनाम् ॥ १३ ॥

वर्गाद्यान्तान्तस्थैरनुवर्णविवर्जितैः स्वरैर्मृदुभिः ।
स चतुर्विंशतिवर्णैः स्वचरितमनुवर्णयां चक्रे ॥ १४ ॥

कुमारतत्राचलकानने त्वं (त्वां)
विलो(क्य)किते ताभ्यां ते मित्रलोके ।

चरत्यवन्यामनुपारियात्रं
वनोर्मिमालिन्यपरा मयापे ॥ १५ ॥
ततो मणिं तत्पुलिने निलीनं
विलोक्य मत्वा पतितं कुतोऽपि ।
पटान्तमानीय चरन्नटव्यां
व्यलोकयं विप्रकमार्तरूपम् ॥ १६ ॥
विचार्य ते केन (किलाप्तमे) त-
न्मयैवमुक्ते लपितं च तेन ।
अकिञ्चनः किञ्चन याचमानो
लप्राक्रियां लाटपतेर्नयामि ॥ १७ ॥
लाटोत्तमे तत्र च मत्तकाले
कन्यानिमित्तं प्रति पारियात्रम् ।
प्रवर्तमाने कटकानुवर्ती
चराम्यरण्ये परियाचनाय ॥ १८ ॥
एवं मयाकार्ण्य मणौ वितीर्णे
विप्रे ततः प्रीतिकरे प्रयाते ।
प्रमीलितं किञ्चन कंच विप्रं
किमप्यनीकं पुरतोऽप्यनेकैः (?) ॥ १९ ॥
ते मामवोचन् परिवार्य कोपात्
द्वित्राणिचान्ये मणयः क्वचेति ।
नावैमि किञ्चित् पुलिने मयैत-
न्माणिक्यमालोकितमित्यवोचम् ॥ २० ॥
एतावतान्यानपि पञ्चचोरा-
नाहूय तान् नः कटकं नयन्तः ।
ते मानवाः कर्णकटु क्वणन्तः
कारालयं नो नियमय्य निन्युः ॥ २१ ॥

उक्ता विविक्ते तु मया किमेतत्
के यूयमित्यूचुरमी च चोराः ।
लाटोऽयमन्योज्ज्वलितो रिपाव-
प्यलं निकर्तुं न तु पारियात्रे ॥ ५२ ॥
तत्कन्यकां लाटपतिः प्रतीतां
नाम्ना च वामाञ्चितलोचनेति ।
आकर्ण्य तूर्णं परिणेतुकामः
प्रचक्रमे मित्रतया प्रयातुम् ॥ २३ ॥
अवेत्य तन्मित्रचरोऽप्यरातेः
प्राप्तिर्नयुक्तेति विचार्य कन्याम् ।
अमात्यमित्रावनिपालयुक्ता-
मनीनयत्तामपि पारियात्रम् (?) ॥ २४ ॥
पश्चापि चोराः कटकानुयाता
अमात्यपुत्रानुचरा वयं ते ।
रत्नानि लाटालयमेत्य वैरी-
त्यचोरयामात्र निलीयमानाः ॥ २५ ॥
वने क्वचिच्चोरितरत्नमेकं
च्युतं ततोऽप्राप्य निकेतमार्ताः ।
एतन्निमित्तं पुनरप्युपेताः
क्रान्ता वयं चैत्रमनीकवीरैः ॥ २६ ॥
आकर्ण्य चैतच्चरणेन यन्त्रं
लूत्वा वयं तत्तमसैव चोरैः ।
लुप्त्वा वयं तान्यपि यामिकाना- ?
मालूय कन्यां कटकप्रपन्नाम् ॥ २७ ॥
तत्रैकतो यामवतीविरामे
क्रमान्निलीनं नयनोऽप्युपान्ते ।

पत्रेण नारीमपि मारयन्तं
कमप्यलङ्काररुचा व्यलोके ? ॥ २८ ॥
तं मारयित्वा वनितामवोचं (?)
का त्वं किमित्यालपितं च तन्व्या ।
अवैतु कन्यापरिचारिकां मा
समानपालः (खलु मानपालः) ॥ २९ ॥
अमात्यपुत्रःप्रणयी च योऽयं
कल्याणिना कालपुरं वृणीतः
प्रकण्टको नाम च भूपतेर्नः
कुलान्तकः पीलुपतेः कुमारः ॥ ३० ॥
मैत्री परा पत्युरनेन चायं
चिरायमाणे रमणेऽत्र रात्रौ ।
प्रेम्णानुनीय प्रतिकूलरूपां
मां मारयन् कारुणिक त्वयाप्तः ॥ ३१ ॥
इतीरितां वाचमवेत्य वाप्यां
रक्तावलिप्तं परिपूय कायम् ।
वेलावतेरुच्चलितैरवाप
व्याकर्णयन् व्याकुलरावमेवम् ॥ ३२ ॥
मित्रं प्रमाण्यात्मनिकेतनेऽपि
व्यलीकमारोप्य च मानपालः ।
प्रकण्टकं पीलुपतिप्रयुक्तै-
र्नियन्त्रितो यातयितुं प्रणीतः ॥ ३३ ॥
न युक्तमित्यत्र च मानपाले
क्रूराणि कर्माण्यपनीत एव ।
प्रकण्टकं किंच तयोक्तमेवत्
सोऽप्याचरन्मारयितुं ममेति ॥ ३४ ॥

लोकप्रलापानिति तत्र चित्रा-
नाकर्ण्य तूर्णं विचरन्नृपान्ते ।
तत्पारियात्रे (?) परिपाल (लय ?) कन्यां
न्यरूपयं तत्र च पर्वतान्ते ॥ ३५ ॥

मारातुरः किञ्चन चिन्तयित्वा
विमुच्यतां मन्त्रि ( आरात् ) कुमार....... !
एतन्मयैवाक्रियतामुना ने-
त्यवोचमुच्चैः करमुन्नमय्य ॥ ३६ ॥

ते पञ्चचोरा अपि मानपालं
पर्यायुरुन्मील्य कुलं रिपूणाम् ।
याता वयं यत्र पवित्रचारी (?)
तं पर्वतं वैरिनिवारणाय ॥ ३७ ॥

विलुप्तमौर्यः पुनरेत्य कान्तां
प्रवाततान्तामिव वेपमानां ।
चोरा वयं ते परिपालनीया
इत्यालपन्तच्चरणान्तवर्ती ॥ ३८ ॥

कन्या तु कामातुरविक्रिया माम्
व्रीलाविलोलाननमालुलोके ।
आलोक्य तत्रान्तिकवर्तिनी मा-
मित्यालपन्मन्त्रि कुमारकोऽत्र ॥ ३९ ॥

वक्त्रान्ममत्वच्चरितान्यवेत्य
प्रीतेयमत्राप्यतिमानवेन ।
रूपेण रम्येण पराक्रमेण
क्रीतेव ते कर्मकरी कुमारी ॥ ४० ॥

इत्यन्तरे मन्त्रिकुमारपूर्वा
मामन्ववर्तन्त परेऽत्र विप्राः ।

लाटः पुनः पीलुपतिप्रणीताम्
वार्तामवेत्याकुलमापपात ॥ ४१ ॥
रूपैरनेकानुचरं विचित्रै-
रालातचक्रेण च वारणेन ।
रणान्तरे लाटप(ति)तिं रिपुन्तं
यमालयं प्रापयमात्तकोपः ॥ ४२ ॥
पत्रेण मन्त्री मतिपालनामा
तां पारियात्राय निनाय वार्तां ।
प्रीतः परं तेन वितीर्य कन्या-
मकारयन् मामपि वीरकेतुं ॥ ४३ ॥
प्राप्तेयमापत्पुनरामयात्मा
मामेवमूचे प्रविलोक्य मन्त्री ।
कर्मान्तमार्ता तवयं प्रपन्ना ?
पुरा पुरारातिमवन्तिपुर्यां ॥ ४४ ॥
मालावती नाम च वीरकेतोः
वरं त्रिणेत्रं वरमर्थयन्ती ।
तं कन्यकापत्यमयाचतैनां
प्रीतः पिनाकी पुनरित्युवाच ॥ ४५ ॥
कन्या वितीर्णा वरवर्णिनी ते
यः कन्यकायाः कलयेत्करान्तम् ।
अनर्चिता त्रीनपि चेन्ममर्तून्
चित्तामयेन म्रियते पुराय- ॥ ४६ ॥
मित्येवमेनामपि पारियात्रः
कुर्याममित्रान्ततयेति मत्वा
तां मत्तकाछाय निनाय कन्याम् ॥ ४७ ॥
.................... ....................

——:0:——

॥ श्री ॥

श्रीसरस्वत्यै नमः ।

# अवन्तिसुन्दरीकथा ॥

महाकविदण्डिकृता ।

हिरण्यगर्भमीशानमाद्यं च पुरुषं हरिम् ।
त्रीनप्यसत्यनानात्वान् वन्दे विश्वशरीरिणः ॥ १ ॥

हृद्यो रामायणं नाम यन्मुखान्मधुनिर्झ(रः) ।
........................................ ॥ २ ॥

मर्त्ययन्त्रेषु चैतन्यं महाभारतविद्यया ।
अर्पयामास तत्पूर्वं यस्तस्मै मुनये नमः ॥ ३ ॥

बभूव जिह्वाभिनयः कवीनां यदनुग्रहात् ।
अनुशासितृ शब्दानां तन्नमामि... .... ॥ ४ ॥

..............................पराः ।
येषां जगत्त्रयालेख्यविचित्राश्चित्तभित्तयः ॥ ५ ॥

सुबन्धुः किल निष्क्रान्तो बिन्दुसारस्य बन्धनात् ।
तस्यैव हृदयं बध्वा वत्सराजो...... ॥ ६ ॥

..................तमानवदेवया ।
गोमुखान्वितया जातिः का बृहत्कथयोज्झिता ॥ ७ ॥

सनारायणदत्ता या देवदत्ताश्रया कृतिः ।
मूलदेवोदि...................... ॥ ८ ॥

(शू)द्रकेणासकृज्जित्वा स्वच्छया खड्गधारया ।

जगद्भूयोऽप्यवष्टब्धं वाचा स्वचरितार्थया ॥ ९ ॥
अप्यतिक्रम्य लोकस्य श्रुतिवर्त्मनि... ।
...... ..................भारती ॥ १० ॥
सुविभक्तमुखाद्यङ्गैर्व्यक्तलक्षणवृत्तिभिः ।
परेतोऽपि स्थितो भासः शरीरैरिव नाटकैः ॥ ११ ॥
राज्ञा श्रीसर्वसेने(न)................ ।
.................विजयं हरिः ॥ १२ ॥
सेतुरूपेण तिष्ठन्तो लोके सद्वस्तुदर्शिनः ।
षट्पञ्चाशत्प्रमाणत्वं गता नः कविपुङ्गवाः ॥ १३ ॥
स्वयं मद्धु.............................. ।
........, कियान् भारोऽवगच्छतः ॥ १४ ॥
लिप्ता मधुद्रवेणासन् यस्य निर्विवरा गिरः ।
तेनेदं वर्त्म वैदर्भं कालिदासेन शोधितम् ॥ १५ ॥
चक्षुः क्षति ............ ।
.................... ॥ १६ ॥
व्याप्तुं पदत्रयेणापि यश्शक्तो भुवनत्रयम् ।
तस्य काव्यत्रयव्याप्तौ चित्तं नारायणस्य किम् ॥ १७ ॥
सर्वतोमुखमप्याद्यं कविमद्य .... ।
कस्तं न स्तौत्यनुन्मत्तः कवीनां चक्रवर्तिनम् ॥ १८ ॥
भिन्नस्तीक्ष्णमुखेनापि चित्रं बाणेन निर्व्यथः ।
व्याहारेषु जहौ लीलां न मयूरः ..... ॥ १९ ॥
..........चित्रायते मम ।
वर्णहीनापि या जाता जात्युत्कर्षगुणास्पदम् ॥ २० ॥
धवलप्रभवा रागं सा तनोति मनोवती ।

कश्चित्प्रगजैरेभिर: . . . . . . . . . ॥ २१ ॥
. . . . . . . . म दामोदरवंशज: ।
आवर्जने तिरश्चामप्येति हृद्य इव ध्वनि: ॥ २२ ॥
धिगस्तु कविकाकस्य तस्य तद्वक्त्रदर्शिन: ।
प्रसारयति . . . . . . . . . . . . ॥ २३ ॥
. . . . दुं दुरुक्तं नाम दुष्करम ।
भालयिष्यति क: कार्ष्ण्यं द्विजातेः कौशिकद्विष: ॥ २४ ॥
खलकाकमुखालीढाप्यमलैव सरस्वती ।
तत्किंचि . . . . . . . . . . . . . ॥ २५ ॥
. . . . . वीं परस्परमनुग्रहात् ।
एधन्तामृद्धिकीर्तिभ्यामितरेतरवल्लभा: ॥ २६ ॥
असुरा: पराजयन्तां जयन्तु देवा: सरस्वती जयतु ।
जयतु महाकविसार्थ: . . . . . . . . ॥ २७ ॥

. . . . . दिमङ्गनामुखे पञ्चांगुलिभिरिव सकलोज्ज्वलवर्णशोभिनी सन्निविष्टा अवजचामरमञ्जरीवाक्षीणदानसन्तानजनितसौरभसमृद्ध्या दाक्षि . . . . . वोत्तमाङ्गनाहिता चक्रवर्तिक्षेत्रलक्षणया; कामप्रस वोपदानक्षमा कल्पद्रुमयष्टिरिव जम्बूद्वीपनन्दनस्य हेमरत्नाचितम . . . कोशसंच . . . . . . . . सद्नलिनीपीतगन्धमुमुदपुण्डरीकावदातगाढस- लिलया सुरानैकवासानवासवत्यागिनी चेयमित्यवज्ञाय वस्वोकसा रा- कोश . . . . . वया मदमञ्जुलहंसगद्गदरवया युवतिजनक्षचक्षोदज- नितवीचीकया वेत्रवत्या विरचितखातकृत्या क्रोडीकृत्य सर्वसरित्स- मुद्रद्वीपपत्तनोत्पन्न . . . . . तभूतमुत्सृज्य जडत्वं स्वयमचलेभ्योऽपि भिरतरेणाकूपारिकं शितेन शीतकालवदमुषारितेन दुग्धजलधि- नेव कैलासशिखर . . . . . (2 a) मगगनाभोगमिव प्रसमाना

दिग्गजैरिव दिगन्तव्यापिभिरम्बरसरिदम्बुधौतकुम्भमण्डलैश्चतुर्भिर्गोपुरद्वारैरुपेता, गोपुरगु.फणाम . . . . . मङ्गाविस्तारबाहुभिरनेकनागाङ्गनागमजनितर्द्धिभिः प्रशस्ततक्षकादिघटितैर्भुजगराजैरिव भोगवतीमहापथैरुपशोभिता, मणिमयसमग्रभूमि . . . . . (विमा)नैरिवामरगणाध्यासितैर्नलिनकादिभिर्महाप्रा. रितैश्च महापुरुषोचितैर्महापुरुषैरिव लक्षणोपप . . . . . . . टशिरोभिर्दृढप्रकोष्ठस्कन्धकूटैरश्लथश्चराक्षैश्चतुरवृत्तिजातिभिरत्युदारैरुदग्रशक्तिभिः कृतवेदिभिरग्राम्य . . . . . सुरभिनागैरशोकरागबद्दैर्महाभव्यैर्विजृम्भितपलाशैः केसरिभिरर्जुनललितैर्माधवीमनोहरैः काम . . . . दैरिव चारुपारावतान्वितै रतिनगरैरिव कृतसालपरिकरैः शृङ्गारान्तःपुरैरिवामलजातिकान्तिभि . . . . . तैरागसमुद्रैरिव स्फुरत्प्रवालपटलैर्धर्मैर्वालापत्यैरिव धात्रीसमधिष्ठितैः कामुकैरिव रचितप्रियालकै . . . . . . . मङ्कैरिव पाण्डुच्छायोदयदमनकैर्गौरीचरितैरिव प्रभवसंपदावर्जितश्रीकण्ठमनोहरैर्भारतसमरैरिव कौरव . . . . सुरङ्गैरिव चारुचम्पकैर्मगधैरिव कान्तपुष्पपुरजनवल्लभैर्भवाङ्गैरिव नागवल्लीपूगशोभितैः सत्सङ्गैरिवाम्लानकरमणी . . . (2 b) नैरिव संगृहीतैर्बाह्यैराभ्यन्तरैश्च वर्धितप्रमदाजनप्रमदैः प्रमदवनैर्निदाघभिया शरणागतं शिशिरमिवाभिपालयन्ती . . . . रमणेन स्वभवनकुटुम्बिना युगपदेव धर्माधिकरणे व्यवहर्तुमम्बुराशिमिवागत्य बहिर्निविष्टेर्वलतेव वडवामुखेन . . . . . . . हलकलकलमिव कलविहतिमदकलननिभृतगतिजलविहगकुलं वहद्भिरनेकपकुलविहृतिभिरवनतमिव जलधर . . . . . बुपा . . . . . . कमण्डलैर्भाव्यमानस्य परिकरा मरकतवेदिकाहरितकमलिनीपलाशस्थितेव विततसितभवनसालमाला . . . . . . . . . लितनितम्बिनीकदम्बकम्पितमधबिम्बप्रलम्बितमञ्जुशिञ्जानकाञ्चीव मा काञ्चीपुरं नाम राजधानी । यया सहर्षि . . . . . .

. . का पर्यभूवन्नगरावती, यस्यां च सौमसुधासमुचिता दिव्यसुधास्वा-दकलसा इव रजनीषु रजनिकरमुज्झिहन्ति रक्तया......... यस्यां च मंजुभाषां कुञ्चितकेशपक्ष्मच्छायातर्जितानि त्रासादिव सततमाकन्दु-न्त्युत्तंसमधुकरकुलानि लीलाक..............मानमवसेवन्ति श्रवणेन्दी-वराणि स्मितचन्द्राणि विहसितानि वैलक्ष्यादिव कुण्डलितान्यावृत-श्रवणं शेरते रते दन्तपत्राणि..........मुद्वहन्ति स्तनावरणारुणांशु-कानि कराकिसलयविडंबितानि तापादिव शनैर्म्लायन्ति विभ्रमाम्भोरु-हाणि नखमणि........फ .........रच्छ्रवयति विलासकुसुमानि श्रो-णिबिम्बलावण्याभिभूतवर्णोत्कर्षाणि विषादादिव दधानान्यां दधत्युत्त-रीयाणि पादपल्लवसहजरागावधीरित..........(3 a) तलेष्वल्प-कारकवलितमिवेन्द्रनीलाजिरेषु तदवमानलज्जाकृताभिरवेशामिव . . . . ....गमण्डलं याचन्ती कृतमानङ्गभावयोग्याभिरनेकशतपुरुषोपग्रहस्का-राभिरपि वृतोत्कण्ठाभिरपरप्रत्यय.........भावानभिज्ञाभिरनुरूपसर्ग-वेदिनीभिरपूर्वाभ्यासकरणकुशलाभिर्गुणवृद्धिविशयित स............ स देवताभिरिव सञ्चरन्तीभिरवधारितरूपलावण्यवैदग्ध्यसौष्ठवतया . . . . . . विशालतया नास्ति बहिर्भुवनमुच्चतया सौधानां लोष्टका इव गिरयः . . . . , गाम्भीर्येण दीर्घिकानामुत्तानमिव सागरतलम-तिशयेन शिल्पकतामाकिञ्चि . . . . . . रपर इव पाकशासनो न पा-ता सुराणां न क्षपयिता सपक्षभूभृतां न कर्ता गोत्र . . . . . . धेतपः परिग्रहस्य नाभिषेकाजनार्दनस्य दिनकर इव दीप्तविग्रहो भोग इव पृ-थुललाटभूमिरुमागुरुरिवायतभुजगभोगः कपिकेतुरिव कर्णान्त.... . . . . . . (3 b) जाङ्गलोदेश इव समस्तरसालो (?) रामीव सु-तनुमध्यवृत्तिः दर्दुराचल इव घनोष्म . . . . . . करादिव राजसम्रा-मर्षादाकण्ठकाचितसर्वकः सर्वराजकहरिणयूथमथनराजसिंहः सिंह-विष्णु . . . . . . . धूलिसङ्गधूसरितया राज्याभिषेकादिव्याक्षिप्तेष्टा-

तकरजो राजीव . . . . . . समुल्लंघनाभिलाषुकेण सकलकरणभया-सहेतोरभि(षे)कप . . . . . दहनदह्यमानकथदर्शितजीवितकमल-संभूतसन्त्रपयेव प्रकामवितते . . . . . . टारया खड्गलतया येन च प्रथममेवाभिनवयौवनापूर्यमाणभुजशिखर . . . . . . . णपार्थितस्य यस्मिंश्च भूभुजि भुजस्तम्भेन भुवं भोगभङ्गो भुजङ्गमानां न च भुजं.... . . . परस्परपातो गोलकानां न च गोलकाः सूक्तातिक्रमो नक्तञ्चराणां न च नक्तञ्चराः।तमः प्रसारः प्रदोषाणां न च प्रदोषाः . . . . . भार्गता प्रभञ्जनानां न च प्रभञ्जनाः रूपध्वंसो लुब्धानां न च लुब्धाः चित्रभासि . . . . . . (4 a) विबुधोऽपि कथामृतरसं (?) कलाकृ-तयेणापञ्च एक . . . . . रसिंहसुखः । स इमामार्यामाकर्ण्य गुणकुतू-हली तमप्राक्षीत् । भद्र कस्यैतान्यक्षराणि विकटबन्धान्योजस्वीनि च लक्ष्यन्ते . . . . . स तु संप्रणिपत्य व्यज्ञापयत् । "देव परमनुगृ-हीतोऽस्मि क्षणमवधानादनुगृहीततमः . . . . . . णावासः ततो हि निःसृता सरस्वतीव ब्रह्मलोकादगस्त्यमूर्तिरिव गिरोद्गीर्णम . . . . . रथकस्य कुवनिवेशिवमचलपुरं नाम गवपोदकपुष्पवासितकलकाननाः-याति . . . . . . . सम्भृतभूतिरधिवसति कुशिकवंशवर्द्धनी सर्वाति-थिरप्रतिगृहीत्री महत्यु . . . . . . (ना)रायणस्वामिनो नाभिपद्म इव ब्रह्मैकधाम दामोदरस्वामिनामा द्यमेत (?) . . . . . . सर्वाङ्गम-नोहरया सर्वज्ञया विदग्धया सर्वभाषाप्रवीणया प्रमाणयुक्तया ललित-पदविन्यास . . . . . स्नेहमसृज्यत । को हि नाम भगवतीं भविव्र-व्यतामतिक्रम्य यथा समीहितेन साधयति पथा? । यतः कौशि... . . . . (4 b) व पुण्यकर्मणि विष्णुवर्द्धनाख्ये राजसूनौ प्रणयमन्व-बध्नात् । एकदा च मृगयां गच्छतामुना नीतः . . . . . यस्याङ्कु-शकेण दिगन्तराणि भ्रमणशीलकीर्तेर्मायेयकुलध्वजस्य दुर्विनीत इति विपरीतनाम्नः . . . . . . . . . . . . . . . . . . . वदनाद्रिसौजन्यं

दर्शयता कवीकृतसकलशास्त्रो कस्यार्थेयमियं च व . . . . . . . . . .
. . . . सौ विंशतिवर्षदेशीय" इति क्षितितलनिहितमौलिः प्रणम्या-
चार . . . . . . . . . . . . . परम्परानुकृष्टमेनमात्मसादकरोत् ।
माहात्म्यादतिशयदर्शिताराधितपुरु . . . . पूर्वकं प्रकटयितुमस्य
पुत्रीकरणेन दर्शितातिप्रसादः तदनुरूपमनल्पपत्रपरि . . . . . .
कृतगानानि कानिचित्तेन प्रेषितानि श्रुत्वा परं प्रीतः कोसहस्रकुलं
च काञ्चनाभम . . . . गणान् स्तन्यमिदमतिबहुत्वाद्धारय प्र-
त्येकं स्नानपानेयत्नगौरवं तव स्यात् । अतोऽस्माभिरेकत्रैव संभृतमि-
ति प्रदी . . . . . . . स च तथा गृह्यमाणगन्धमादनप्रभृतिभिः
श्रीवरकृतैः संस्कृतप्राकृतानां च . . . . . . . (5. a) . . (ग)
म्भीरानुज्ज्वलराजहंसोपमहप्रकाशतेजसो . . . . . . . . . ध्वनि-
रङ्गनाजनचरणपद्मजल्पाकनूपुराहतभवनदीर्घिकाकल . . . . . . .
कृतिरभिमतदेवाराधनपरपुरन्ध्रिमण्डलारब्धबहुविधोत्सवस्वनश्च पल्लवद
. . . . . . दध्वानः मध्यमस्तु तेषां मनोरथो मनोरथ इव चिरे-
णोपपन्नः कालिजिगीषो . . . . . . . म्महद्गुणरत्नराशिभाजो
महासत्त्वान्महोदधीनिव मध्यमो लोकश्चतुरो दामोद (रो)....शुद्धवृत्तस्य
वीरदत्तशर्मणोब्रह्मर्षेर्वसिष्ठस्येवारुन्धती सती नाम कामिनी गौ (री) .
. . . . . . . . . . दण्डिनामानमविन्दत । पितुरस्य प्रेयसी
सपत्नीपुत्र इति कृत्वा म . . . . . . . न्तरे परचक्रपीडया पर्या-
कुलेषु द्रमिळचोळपाण्ड्ये (षु) . . . . . . . (5 b) रामपङ्क्तिकेषु
भमासु सभादिप्रपासु . . . . . . . . . न्धुवर्गः प्रहतप्रायपरिजनः
प्रवृत्तवृत्तिक्षयो दुर्भिक्षक्षीणके . . . . . . . किंतेषु गुरुकुलेष्वल-
भत चानवद्यां गरीयसीषु च ब्रह्मक्षत्त्रस . . . . . . . या विस्मा-
पितदुर्जयस्य मान्धातृनाम्नः स्थपतेः प्रशस्तवास्तुशास्त्रार्थसारस्त . . .
. . . . . ास्तुविस्तारषण्णवतिप्रासादविधिविशारदो यानासनशय-

वादिना . . . . . . . . . तीयमयोक्ता षट्त्रिंशदाचार्यगुणैरलंकृतो ललितालयनामा स . . . . . . . विरचित . . . . रादृष्टिनिर्दिष्टायां भूमावुपविशत् । दृष्टेऽपि तस्मिन् विस्मय . . . . . - मेष किल यन्त्रमयमिन्द्रजालिकं कृतवानेष किल सं . . . . . . . पित्रा यवनामप्यातिशयानेन क्षुधितोऽयमिति यन्त्रो . . . . . . . (6 a) मवसिता एव सर्वे नित्यप्रमादशैथिल्यां शिल्प . . . . . दिवैतस्मिन्नैपुणमपि तदनुग्रहार्थमेव . . - . . (शार्ङ्ग) धन्वनः केनापि कारणेन मणिबन्ध एव भग्नो . . . . . . अनुरूप . . . वेति द्रष्टुमर्हथ नहि वः शक्यमस्मादृशामसाधारणे . . . . दानदीक्षयाप्यसंतुष्टा त्यागशक्तिः सनीत्या कलासमागमसभागृहं . . . . (कु) मारः सहपांसुक्रीडासंभूतस्नेहराशिरब्रवीत् "आर्य संभाव्यता . . . . . कारस्य सकलविद्यानदीपूरवारिधेस्तथवित्र . . . . . . व्यामङ्गेष्वतीतकलासु कवितायां च . . . . (6 b) च व्याख्यानचतुरश्चतुर्वेदवित् सर्वजनह . . . . . . करस्वामिनो देहभज (?) सदजकीर्तिराम्नायनिधिर . . . . भूमिदेवनिवहचूडामणिर्देवशर्मा त्वद्दर्शनाय केरळेभ्यः काः . तद्दोषामपि सङ्कल्पानुकूलोऽयमारम्भो निर्विचारम - - - परेद्युः सहमित्रजनैः श्रीअनन्तनारायणभव्रमानन्दप्रभृतिभिः सह - - - - - लीनक्ष्माभृत्पक्षच्छेदाक्रमसहस्राक्ष्दे - - - - - वैरिणममरगणमसुरसैन्यसंमर्दे - - - - - - - - मदसेकपपातकाकुलितवनं वनषण्डमिवोत् - - - - - - - - - - - (7 a) श्चर्योद्भवकूटसाक्षिणमिव कालकूटोदीरण - - - - - - - - - नभसो भासुरभुजङ्गराजस्फुटफणारत्नचक्रवाळकरमलितं - - - - - - रणप्रकाशसौभाग्यराशि—(शि ?) विषभोगभो - - - - - - - - - - णमूलं राजमन्दिरमुदीक्षमाणस्तरलतरङ्गभङ्गभ्रमणभेदिभिङ्गमोन्मुखमुखा - - - - - - - - - - परिमळेन स्फारसुरभिचम्पकाशोकपृक्षोरवलपुन्नागतिलक - - - - - -

न्यव्याकोशकुवलयदामश्यामळाभिर्लक्ष्मीकटाक्षमालाभिरिव . . . .
कैटभदानवापतशङ्कानिरूप्यमादिशेवशे (?) - - - - - - - - - -लासनं
भगवन्तमुत्फुल्लेन चक्षुषै - - - सुयुगलम - - - - - - - - र - - -
न्ततस्तदर्पे - - - - - (7 b) - - - शिल्पिवर्यः कृतार्थौ - - - - -
- - - प्रत्युद्गतो भगवन्ना हितारसवासोद्भवकान्तिहेतुरपर - - - - -
- - - सौरभ्यसंशयावह शतमखपरिभुज्यमानदिव - - - - - - -
- - - तिप्रबलविस्मय प्राहितहृदय: सर्व एव तेकिमप्युल्ला - - - - -
- - - र्मिपावकज्वाले वा रक्तमेवोत्पतत्सपक्ष पर्वतशिखरा - - - - -
- - - वच पश्यतां - - - तेषां लोककल्लोलमालोल्लसितोपस्तस्तं स्यन्द - -
- - - - - - - - र(?)न्त्रेणैव दिव्यस्रगनुलेपनाभरणः कृपाणधारा...
- - - - - - स च भगवन्तं प्रदक्षिणीकृत्यहेतिगर्भमञ्जलिमुपा-
रचयत् । उत् - - - - - तेऽस्तु लोकोऽतिमात्रविस्मयविस्मृतान्तरात्मा
निरन्तरो - - - - (8 a) - - - ल्यत्रन्ध्यवागलभ्यरन्ध्रस्थूललक्षो
विचक्षण: कलासु वि - - -- (वि)श्वामित्रगोत्रः कृती रामशर्मा नाम
बालमित्रं चित्तावर्जनेषु दाने- - - गौरीपुत्रस्यापि प्रत्यक्षएवायमध्यक्षय-
द्भिर - - - - ण्डलानुकारिणा रक्तपुण्डरीकेण । पुनरमुष्य पुष्करस्य
परिणतिः पुष्व - - - थमद्यत्वेवं पुनरीदृशानामसुलभदर्शनत्वादल-
घुविस्मय - - - - तिरिति स तं प्रत्यवोचत् । सखे न स तु स-
र्वेषामेव नः समान - - - ादनुव्याहरादम्बुरुहत्वमवाप्याम्बराद्म्भ-
सान्निधौ पतितस्रोतो . . . न्तमेव हृदयं तदेहि गच्छाम इति सह
सहायै: काञ्चीमेव न्यव . . म् . . . (8 b) शाभगोद्वादश्याम-
श्रुतभक्तियोगः कल्पोक्तेन विधि . . . . दत्रयीशरीरस्त्रिभुवनपति-
स्त्रिधामा प्रतिभाकृत (?) चैतदाश्चर्यभूतं सर्वपुर... ...........भेदसंमतं
सर्वादिराजवंशवर्णनमनोहरकथं सर्वदेवासुरवृत्त...............पारमत् ।
उपारमत यामिनी । विस्मयप्रतिबुद्धस्य चास्य लोत् ...............(स)लि-

ऊाप्लुतः सुचिरोपस्थितपूर्वसन्ध्यः स्वनुष्ठितभगवदाराधन........ ........षः शुश्रूषवे सुहृद्गणाय कथामवन्तिसुन्दरीमाचिख्यासुरित्यभाषत ... ....... वतो भक्तभयहरणविधिविचक्षणस्याम्बुजेक्षणस्य.... ... .......यमहं कथयामि श्रूयताम् ।आसन्नसंकीर्णे विवि त्वर्णाश्रमा.... .......र्यंपश्या असूर्यंपश्याः सुन्दरपुरन्ध्रयो निरवगहान्नि........(9 a or b)यविशालवप्रा प्रैहेय (?) विशाला वप्रा... ...... ...... मौगीनोर्वेरामासुरीणवरभुवः प्रचुरमक्षीरकपरिय . . . (?) ...............नप्रसुकरखेटकप्रकटयोनिपोषागोजावि (?) .............वनराजयो बहुफलेमहिद्रुमसमप्रोद्मग्रामसीमानः सारसकळहंस................प्रत्युदपानप्रक्लृप्ता भवहारिणः (?) पुष्पाराममालिनो मगध...............यतकले स्मृतिरपि नाजायत जन्यस्याचिन्तापि नासीत्तास्कर्यस्यप्र.... ...........देषु कुंकुमपङ्कः केवलमाक्रीडाचलतटेषूपलाः कण्टक ...............ासन्नं च विहरत्सु जलविहङ्गमेषु ते न चान्योन्यस...... ........ (9 b or a) रभसमहास्यतेव विकस्वरेण कुमुदकोकनदसा.... ...........भवनीभूतानि भूधरकुलानि राहुमुखविषनिषेकदूषण....... ...... ण्डच्छलेन मेघमण्डलानि तस्य चैवंविधस्य मण्डनं

म . . . . गरागरोषितेनोर्मिमालिनेव महता खानवलय............... दुमण्डलादिवोत्कीर्य क्षिप्तममलमणिभूमिगर्भसंक्रान्त............... ेद्धरण . . . र्विशद्भिर्दारुसारमयैर्महाप्रासादैरुपशो...............ारणैः समुद्भासितमुन्मीलदनेकरत्नरागवल............ रागविन्दुराजिभिरुन्मिषत्तार–कागणकरालितान्ध·········.....तबहुविधकुसुमधूलिपाटलपटमुप . . . . (10 a).... रिगमनावलेपवारणायेव प्रकम्पमानोच्छ्रितपताकव्यस्तमखिलजम्बूद्वीपलक्ष्मीलतैककुसुमं कुसुमपुरं नाम समग्रश्री... ....... ....स्रोपरुद्धगतिरमर्षज्वलित इवोत्सर्पदरुणमणिप्रभाप्रवाहोपरक्तवपुरम्बरम्बरमध्यस्थितोऽवमुक्तशैशवच्छाया इव.... ... ....... रवादिव समस(मुद्र)तरङ्गसंघातघोराघातायासितापि न कदाचन चलति भूतधात्री । यं

च निवसता धन..............णष्टात्मभिश्च व.... भवनमनन्तैश्च .... तीं, यस्मिंश्च पौरा न मधुपायिनो दानरुचयश्च न कु.................त्तयो भोगिनी.... बहुलभाषिणो बृहत्कथा....... जलाशया: सेतुबन्धलम्भाश्च न प्रमदस्पृश: कादम्बरीरसा न दृष्टय: समन्दाश्चाश्च विश्रुतबहुश्रुताश्च रामायणादि.... भिन्नाश्च दृष्टमहाभारता भीमगदाभिघातवार्तामुग्धाश्च प्र.............टा निर्विरोधरमणीयमभ्यस्यमानपुण्यकर्मण: प्रभि.... स रसि चित्रायण्यां कात्यायनस्य भगवतो हुताशस्यात्मजन्य..............
(10 b) ब्रह्माश्चर्ये सप्तजपादप: (?) क्रमयमानकामिनीकपोल........ पतिमधूकपुष्पं पुष्पपुरं च तत्पुष्कर इवानन्तभोगमुत्कृष्ट...... .......दत्तो नरवाहन इव पुण्यजनाश्रयं निधीश्वरो हरि... र्यमहाप्रभावर्षिपादो गन्धवह इव घनक्षयमशेषश्चिव.......... ...इव भोगिनिलयमखिललोकधृतिकर:.... युध इवोज्ज्वलप्रमदवनमात्मगुणाभिभूत फाल्गुनश्चाश्च.... .............. तिष्ठन्नात्मयश.... भूषणभुवनरस..............यमतिमानुषाकारसंप.......... ....बन्धसम्भूतव्रत....पुनर्जातामिवमी.......रेप्रजा: । येन च गोवर्द्धनधरणिधरधारणो दामोदर:...............मेकगौरवं भू...जभूधरयुगलमना..............बिभरां चक्रे । यश्च नयनाधरकरणचरणप्रभाभिनवबन्धु.... ..........वृत्तलक्ष्मीविस्मृतानि कदर्थयांचकारेव कमलकाननानि । यस्य च मत्तमातङ्गतुङ्गकुम्भकूटपाटनेषु सुभटमण्डलपृथु.... र्मिवेगव्यावर्तनेषु स्यन्दनबृन्दवज्रपञ्जरव्य्वनेषु च व्यापारितस्तदायासपिपासित इव समरमण्डलेषु बाहुदण्डोम....... ...... (11 a) यश: क्षीरसागरमशेषमाचूचुषत् । यश्च सम्यक्प्रणियमान..............कदर्थनां कलिरास्थं सरस्वतीहृदतमित्रवर्ग: सर्वमेव च शरीरं महापुरुषलक्षणानि प्रत्यव.........संहतय: स्थूलकरावलूनकवलप्रवालमुण्डमूर्द्धान्नोद्भूतप्रसूनमुकुलपङ्क..........नोदाज्यमस्तकघातभग्नस्कन्धमुक्तस्खलिता प्रद्युम्नपीडाविप्लुसे व्यसनमपि मर्त्ये काकुत्स्थकपि ........... बालोक्काप

गर्वितो वेनसूनुरिति ऊ......शिशिरकरशिशिरगुणैर्दिवं पृथिवीं दिशश्च सर्वाः सुरभि......मश्च न वर्णव्यतिकरो न वर्णव्यतिकरो..... न राजाविनयशङ्कान— राजविनयशङ्काश्च......नाशनचिन्तानाश.... पाकशासनोऽपि नावग्रहं शोकं कर्तुं त्रिभङ्गं पुनरन्ये । स च राजा सकलमण्डलप्रासराहुचिह्नया संरम्भ...... ..भसभिघातवेलावनलेखया रिपुजीवितमधुचूषणभ्रमरमालया भुवनमहानिधानरक्षण........ (11 b) सरनिलीनभेघराशिकया वीरकार्मुकविजयलक्ष्मीसङ्केताभिसरणत्रियामया यममाहिष.........लां, सकलकुसुमसम्भारभरितारण्यधम्मिल्लबन्धां, अन्तारिक्षनीलांशुकोत्तरीयां विश्वमेव विश्वम्भरा,..... विस्तारविविक्तबुद्धिषु सकलकलावगाहवैचण्येषु दुष्टराजलक्ष्मीकरेणुकाविनयनवारणांकुश... ... ...रणेष्विव पदबन्धविधुरितभुजङ्गलो.... गमालिष्विव प्रवरगुणरत्नराशिसम्भवेषु निसु........ण्डलावलम्बनेष्वैरावतविषाणक......वगुरुप्रतिमानेषु सुमतिसुमित्रसुश्रुत........नराग-वर्त्मना मन्मथप्रतिमकान्तेरन्तःपुरेष्वरमत । आसीच्च तस्य महीपतेः समस्त.... ....सौकुमार्यैरवयवैरसाधारणमार्दवाभ्यां च......मानसाभ्यामुपेता तथा सुकुमा........भ्रुवैव कार्मुकमुखच्छाययैव चन्द्रमसं श्वासेनैव सुरभिपरिमळं मल......... (12 a) सरत्नमेखला विपुलोभयनितम्बचुम्बिना मदनव्यालहस्ति बालहस्तेन पर्यभिसारदुर्दिनमुपसारयन्ती वदनचन्द्रमण्डहठापकृष्टपुण्डरीकलक्ष्मी........ताभ्यां मृणालिकाभ्यामिव शिरीषदामकोमळाभ्यां भुजलताभ्यामुद्भासमाना, सर्वशरीर......भक्तशेषाभ्यां सौन्दर्यपुञ्जाभ्यामिव स्थापिताभ्यां हरदग्धमनोभवोद्धृत्यसार........मिव तथाकृतोपयोगाभ्यां धात्रा चन्दनधवळक्षुधालेपोचिताभ्यां......निवासकुम्भाभ्यामिव रागस्य स्वच्छमानसरसातिरेकपूरिताभ्यामिव गुरुतराभ्यां पयोधराभ्यां भ्राजमाना, गजकुम्भकठोरपीवरकुचातिभारसाधा...,.,.......माणुत्वादेव भुवमभंगुरां

विभूतिं मध्ययष्टिमतिजघनघनाभोगभारखिन्नोरुदण्डस्थिरीक्रियोपभुक्त भूयोऽवयवत एव तनुतरीभू........द्वितयेन राजमाना, प्रणयकलहताडितप्रियतमहृदयोज्ज्वलितरागालिप्तयोरिव नखचन्द्रदशकरश्मिनालिकासहस्रचूषितेनाशेषभुवनवारिजवनप्रभासम्भयेनैव सततमाप्यायमानपाटलिम्नोरमलरागलावण्यच्छलादरुणाशोकपादपेभ्यः स्तबकराशीनिव दोहृदपूरणतरलनेषु दातुं संगृहृणतो मुखकमलामोदनिर्जितवसन्तकरदत्तमिव सर्वपल्लवसौकुमार्यमुद्वहतोश्चरणारविन्दयोर्द्वन्द्वेन सैन्धूरीरिव दूरभवः(?) कुर्वती, तरङ्गमयी भ्रूपताकयोः, इन्दीवरमयी नयनयुगे, रक्तोत्पलमयी दन्तच्छदे, कुमुदमयी ईषत्स्मितेषु........निश्वसितेषु........ (12 b) अमृतमयी वचासि, प्रसादमयी मनसि, चक्रवाकमयी पयोधरयोः, आवर्तमयी नाभिरन्ध्रे, पुलिनमयी नितम्बतटेषु, पुष्करमयी च पादतलयोः अमर.....पभोगावतीर्णा मन्दाकिनी लीलाकराकान्तिरागचातुर्याणि पञ्चेव पञ्चभूतस्थाने प्रतिविधाय निर्मितेव प्रजापतिना, प्रावृडिव घनगम्भीरस्तननाभीरमणी, शरदिव सरसां कान्तिमुद्वहन्ती, हेमन्तवृत्तिरिव प्रालम्बिनी हारमालिनी शिशिरश्रीरिव नवनवमालिका, वसन्तवेलेव चारुभुजवासभूषिततनुलता, घर्मसम्पदिव कोमलपाटलाधरा सर्वर्तुसमवृत्तितयैव नन्दनस्वभावा, सर्वावरोधप्रधानभू, रतिरिव दर्पकस्य, शचीव शतमखस्य शैलसुतेव विश्वेश्वरस्य लक्ष्मीरिव पुष्करेक्षणस्य, बुद्धिरिव धनाधिपस्य, देवसेनेव सेनापतेः प्र........रोहिणीव बुधभावनस्य, अरुन्धतीव असुभ्योऽपि वल्लभा देवी वसुमती नाम ॥

तस्मिंश्च सम्राजि राजीवलोचनयान्याभिरप्याधिक........शालिनीभिराविरूढानेकधर्मार्थाभ्यनतिसङ्गमङ्गजसुखमश्नुवाने, कदाचिदभिषेक्तुमिव दिग्जयाय पुष्पजमाजगाम द्रुमलताधृतैर्मधुनिवहवाहिभिः कुङ्कुमकल्प............हस्तैः कुसुमलक्ष्म्या समयः मध्ववतारवेगोद्धूतमि-

व हिमजलं जगाल । दक्षिणा......चक्य दिग्वधूमुपेयुषि पटौ पतङ्गे अतीवोरुतरमुत्तराशासौभाग्यमुवाच ह । दिनकरविरहे समगृहीतायां दिशो दीर्घनिश्वास इव मन्दमन्दमुत्सर्पं तप्यमानपान्थजन........य-मारुतो मलयमरुत्प्रेरितेन स्मरवैश्वानरेणैकभवन इव त्रिभुवने सुरासुर-मुनिमनुजमादीप्यमाने तद्दाहप्रतीकारक्षमाणि पयोधरकलशसहस्राणि शर......(13 a) मिजना: कामिनीसमाजस्य, चित्तोपसृताप्रियोष्ण-बाष्पवारीपूरप्लुतेषु प्रोषितानां हृदयेषु पाययितुकाम इव कामव्योत्क-र (?) प्रकामानिषूश्चिक्षेप । ...स... तरुतलास्तीर्णकिसलय शयन-शायिनीनां कामय (?) कामिनीनां कामशरीरक्षते......क्षेप इव म-र्मसु मधुरसासिसर: परभृतनखमुखोद्दलितकुड्मलगर्भनिर्गलित: पपात । तस्मिंश्च समये रतिसमरविधिविशारद कुसुमशरशिबिरनीराजनज्वलन-ज्वालाव........वलीषु च राजपुरन्ध्री माहारजतोत्तरीयांशुकवतीषु स-कलजगत्प्लावनोद्वलरागसागरतरङ्गवेणिकासु विकसन्तीषु रक्तकुरवका शोकशल्मलीपलाश....पारिभद्रडाडिमजपाराजिषु रमणीयचरणनलिन-ताडिताशोकरोषप्रोत्साहिताशेषवनसमाहृतशशिकरकलाविभ्रमेषु निर-न्तरपत........ मुखप्रकरजर्जरितन्यश्मपवनविविधवृक्षविग्रहधवळक्षेप-टुबन्धेष्वन्धक्रमथनमन्युसन्धुक्षितेक्षणाशुशुक्षणिक्षपितहृच्छयोच्चयभ - स्मभासुरेषु करीरकेसरेषु सितसिन्दुवारबकुलसालतिलकनवमालिका-दिषु ललितमाधवपीतवाससि मधूकवनस्थलीदिष्टवृद्धिविघातक (पिष्टा-तक ? ) प्रकरे(र)स्फुटाम्रिकटकिङ्किरातकर्णिकारचम्पकप्रकरेषु स राजा मत्तवारण इव वशाभिर्मत्तकाशिनीभि: परिवृतो मधुमत्तमधुकरकदम्ब-कान्धकारितकोधानि क्रीडावनान्यवगाहत ॥

तत्र च मदरक्ततकामिनीकपोलरागसन्ध्यागमविधुरितसरश्चक्रवा-कमिथुनकानि बभ्रत्, पानगोष्ठिमण्डलानि त्रिदिवमेदिनीम...कान्तह्ह दिहक्षुआ कौतुकाविवाध्यवसितगगनानां खेदखेदिताल कम्मेषुक•

वानि भ्रान्तकन्दलभ्रमितदुर्दिनो......गीयमानस्वविक्रमापदानानि च पश्यन्, . . . . . (13 b) यन्त्रडोळप्रेङ्खितानां कोमळकुसुमकिसलयोत्तरच्छदासु विलोकपल्लवान्तरप्रविष्टपवनाळोलितलतागृहोदरमणित . . . . , तचीनांशुकान्तरीयाणामपि करनखमणिरश्मिसंवलितरत्नमेखलामयूखजालजाल्पितदुकूलकर्मणामन्तः पुरसुन्दरीणामरणितरत्नशकरीतुलकोटिपारिहार्याङ्गदानि, प्रेङ्खोलितहारदीधितिप्रकरकर्पूरचूर्णावमुच्यमान श्रमाखिन्नकुचतटानि, मधुरविवाददत्तदन्तच्छिन्नसन्निवसमाधामनदत्तसदयलीलाचुम्बनानि, गाढालिङ्गनमृदितकण्ठदामप्रतिनिधीकृतप्रियतमेक्षणकुवलयसृश्चि, मंजुविहङ्गभाङ्गिरातिप्रपञ्चमूर्च्छिताङ्गजविदाहवेगानि, रागसाम्यसमाहितरसोत्कर्षाणि राजवृषो रतानि निर्विशन्नुपवनविषयिणीमृतुविभूतिमनुबभूव ॥

प्रवृत्तयोश्च विचित्रपुष्पयोश्चैत्रवैशाखयोर्दैत्यराज्यमिव शुचि शुक्रमयं यमसौराज्यमिव प्रतिदिनमरुणायमानेन करविरसीक्रियमाणलो . . . . . रक्षोराज्यमिव परिलघुप्लवङ्गलंघ्यमानहीनवाहिनीजलं, किंपुरुषराज्यामिव द्रुमगणगुरूष्मवारणवनोत्सेकरागदृप्तकिंपुरुषं, मन्मथराज्यमिव मरुद्गणभ्रमितपत्रमण्डलापरुद्धसुरभव . . . . सुप्रातपमनुबुभूषुः, उत्थ . . . . मलरक्तोत्पलानि प्रदीप्तानीव घर्मभयप्रविष्टेन कन्दर्पानलेन दलशीतलजा . . . . जातशीतळजलतलानि दारुणनिदाघगलिताशिशिरकारागृहाणीव मधुकर . . . . (14 a) निबहलकालान्धकारकालोदराणि करतलोदरीभिः सह सरस्यवजगाहे ॥

प्रविशन्तीषु च प्रणयिनीषु प्रियसखीष्विव प्रत्युदस्थुः प्रसारितोर्मिहस्तदत्तगाढकण्ठग्रहा वाप्यः प्र . . . पक्षविक्षेपवारिदुर्गप्रतिस्तब्धैः प्रसन्नमिवोदीर्णदण्डैः पुण्डरीकैर्विमुक्त . . . . द्वन्द्वेषु मन्दं शब्दं सुन्दरीमुखेषु शिलीमुखा निपेतुः । निमज्जनाद्युपायव्यसानितस्य पुरुष . . . तमिष्वधारागणस्य (?) भोधा (?) भ्रान्तिदिदृक्षव: कटा-

क्षानम्भोगभंशायिनीनां पक्ष्मलाक्षीणामुदवर्तन्त क्षोभतरलितास्तरुणशफरकाः । नृपतिनितम्बिनीबिम्बाधरचुम्बिनो नाभिजग्मुरतिचपलाः सरस्तरङ्गा अर्घमानानामाननमपि तु विलसन्तो विसर्पिणां मार्गमूहुः। प्रतिमुखस्थितकुवलयक्रोडादिवातिवामानि भामिनीनामरज्यन्त लोचनानि । चकोरलोचना कुचारोहचक्रः संमर्देऽपि कलुषीभवद्भिरम्बुभिरौत्पत्तिकत्वं जलत्वमनक्षरमाचचक्षे । गुरूनपि निरपेक्षो जघान वारिवेगो वरोरूणामुरोरुहभरान्, न हि विवेकः क्षुभितस्य । जलमध्ये मौनमाचरन्तो मेखलाकलापास्थान एव गुणत्वं समर्थयां बभूवुः अपास्तालक्तकैः केनापि निराशेनेव दशनच्छदकिसलयैः व्यजीयन्त रक्तकुवलयवनानि येषामनेकशो रतिरणप्रणीतोत्थितानां प्रतिस्पर्धिजये सहायकृत्यम् । इत्थं च वर्तमानासु पवरपवतूणीतीनां (?) वक्त्रव्यतिकीर्णापि विकीर्णितोर्मिषु करपुटसलिलसेकलीलाभूतालिकासु प्रहेलिकासु महीशोऽपि महावराह इव वहन्नक्षसा वसुमतीं देवीमाकुलाकुलामालोलयन्नपश्चचाल चिकुरांसतटाश्लिष्क्रीड । क्रीडासु प्रकीर्णप्लुतनिम्न . . . , स्वास्थलव्यचारपति तद्रूद्रव्यावि चयव्यतिकरभेदादष्टमार्गया जलक्रीडया तत्प्रधानाङ्गेषु च स्फुटगद्गदगम्भीरभेदादिस्वरेण . . . मुक्तसंज्ञेन सलिलवाद्येनानेकमधुरकरण . . . णमुक्तैः प्रीतिपल्लवद्रवैरिवैनं धाराजलैः . . . . . रशृङ्गकोणमुखमुक्ताभिः कुंकुमजलधाराभिरनङ्गपन्नगमुखशिखिशिखाभिरिवावचकरुः । अपरा विपक्षव्यञ्जितविलासरागरोषिता रक्तकटाक्षमालाभिरेवजिह्मनामाभिः कौसुम्भसरिद्भिरिव सरभसां विधुरायमाणमाचुक्रुशुः (?) इतरास्तमसीव पयसि दुर्विभागगतयः करतलकमलावष्टम्भप्रसृप्ता यादृच्छिकैर्नाम तच्चरणमूलघट्टनैः स्पर्शातिशयानुमेयप्रार्थनप्राणिपाता न कृपणमन्वतिष्ठन्त ॥

अवनिपोऽपि गर्विता व्याकुलयन्, मुग्धाः सन्तारयन्, भीताः समाश्वासयन्, कुपिताः प्रसादयन्, मुदिताः प्रोत्साहयन्, प्रस्थिताः

प्रतिरुन्धन्, कासांचिदुत्पलाशां वल्लीमिव संफलयन्, कासांचित्पद्म रागं रत्नमिव संपादयन्, कासांचिदमन्दमारभ . . . . मनोरंशुका न्यलक्ष्यगतिराक्षिपन्, कासांचित्कमलस्रजस्सङ्गधूननच्छलाभिरश्नन्‌· स्निग्धताम्रारलताराणि नेत्रोदराणि चुम्बन्, कासांचित्कामायतनेषु कामशरानिवादृश्यपातान्नखानर्पयन्, निबिरीसविलासश्चण्डातकपरि· हितः पर्याकुटिलकुन्तलोत्तरापाङ्गलोचनः कुंकुमरागलौहितौघप्लुताङ्गः सन्त्रासितसकलराजहंसनिवहो विहृत्य समरादिव सरसः सह प्रिया· भिर्जयश्रीभिरिव निर्जगाम ॥

जगाम चामज्जनानन्तरमनष्ठितयथोचिताभिषेकमङ्गलः यथा· विध्युपस्थाय तिग्मभानुं भगवन्तमुपास्य चित्रभानुमभिराध्य च देवं देवकीसूनुं सह सुहृद्भिः . . . . श्चानुसारिणा सुरभिचन्दनरसेन कृतसमालम्भनः कुशलसूदसाधितेन शोधनकल्पनप्रक्षालनप्रतिस्तम्भन· मार्दवकरणशीतीकरणप्रसादनस्नेहग्रहणवर्णक्रियागन्धोपसंहारषड्वर्ग(व· ध) . . . . (15 a) दनस्नेहविचारपङ्क्तिसंज्ञाभिस्तयोदशविधाभिर· नेकाबान्तरविकल्पाभिः क्रियाभिरुपसंस्कृतेन स्वात्मोचितेन सरसंस्वा· द्येनामृतातिशायिना पटुपाटलपरिमलामोदनिर्हारिणा स्म . . . . येन पानीयेनाहितधृतिरादाय धूपवर्तिमाचान्तो बहलपारिजातसौरभोद्गा· रिक्रमुकफलशकलानि शकवधूटीगण्डपाण्डुरां च ताम्बूलवीटिकां . . . जरठपाटलीपुटक्रोधपाटलं च शङ्खचूर्णन्त्रय . . . . कटुकाविशदं वि· मर्दोष्णं लपनलाघवकरं चोपयुज्य रज्यमानदशनामराणो मणिकुट्टिम· पथेन गत्वा प्रसाधितं मुक्तस्थानमण्डपमतिमृदुतिक्षौमपाण्डुनि स्थान· दकचीनपट्टोपधानके पुष्पवाससुरभिणि हैमप्रीतिपादुकप्रतिष्ठितप्रवर· रत्नचित्रपादे पादपीठसनाथपार्श्वे प्रत्यासन्नसौवर्णप्रतिग्रहे शयनपर्यङ्क· तले मुहूर्तलब्धविश्रमः सन्निहितः . . . . सामन्तान्चित्रालापचिरवि· नोदिनो विसृज्य तद्विलम्बमाने कदम्बमुकलाकिञ्जल्कपुञ्जरविषि स्व·

रितप्रवर्तितस्यन्दने सन्ध्यामुखचुम्बनाभिलाषिणि क्रमेण मन्दायमानोष्मणि मणिशिखासुखालोकलोचनेन सुखविविक्तोद्गन्धिनैपथ्यरमणीयेन विजृम्भमाणमल्लिकामुकुलदामप्रलम्बोत्तरीयरमणीयेन सुन्दरीजनेन चन्दनसलिलसंक्षालनाशिशिरेषु स्मेरमल्लिकोपहारेषु सौधहर्म्येषु सुसंस्तसंशितगीतगोष्ठीभिश्च प्रियविदग्धसुहृत्सख: प्रदोषमनैषीत् ॥

उत्तरयामद्वयमुन्मदमश्रुवादिनीजनमनोविधेयवृत्तिरगमयत् ॥

एवं च परिसमापितग्रीष्मस्याशेषशिरीषश्रीमुष: क्षपितकरञ्जमंजरीत्विषस्त्विषिमल्लोमगोलकरातिरक्रियारम्भजजम्भकाजनाभिनिबर्हणाज्ञाविजृम्भिताम्भोदकोदय: कुटिलकोमलतटितो विघटमानकुचकट्मलामोदलिप्तककुभ: केसरसुरभितनभ . . . , (15 b) चन्द्राकिबर्होत्तरारासिता भून्नगोपगुप्ताकेगोगणागणातिथा द्रुमातकस्रजस्सुजातजातिजातयो मुदितमुग्धयूथिकावर्षन्नववार्षिकी लतालालितलाङ्गलीकलिकामुकुलितनिचुलवथिय : . . . , तयो विकचकदम्बचुम्बिवाचालमधुलिह: सलिलकणस्यान्दिमन्दमरुतो कृतमुखरभेकभेरीभीमागमानिशिथानिशीथिनीभेदाबरदुर्दिनदिनाद्भुतमनोऽभिसारिकाभिद्रुतदयितोद्वासिता विकसितबलाकालीधवलितभुवो भिन्नशिलीन्ध्रबन्धनासिन्धुरमामन्द्र गर्जितघनाघनस्तनयित्नवो नवजलसेकनिर्वृतिविनीतकेतकीगर्भखेदापादचारक्षमश्यामलशाद्वलवनस्थला नीलकण्ठनृत्तलीलाविलासिन: सन्नापन्नगकुला: कूलमुद्रुजोद्कीद्रवत्सरित्तरङ्गिणीशताश्शतमखगोपावलीप्रवालमेखलाधृतवनस्थलीनितम्बपार्श्वोपार्श्वविश्रम्भराङ्गावरूढसरस ., यौवनावनजपवनस्य . . , सनदायिनो दीयमानदानवारियोगनिद्रासुखा: सुखमया इव प्रादुरासन् प्रावृषेण्यवासरा: ॥

तासु च ग्रीष्मातपातुरत्रिलोकलक्ष्मीविश्रान्तिधारागृहेषु वर्षावासरेषु कुटजकुड्मलहारमालिनीभि: लम्बकदम्बकाञ्चीदामभि: केतकदन्तबर्हपत्रभूषितश्रवणपाशाभि: मदमयललामलाञ्छितललाटिका-

भिरार्द्रगैरिकरागरञ्जितचरणपल्लवाभि: कुन्तलवलयिनीभि सुन्दरी-भि: कृतकिराननितम्बिनीवेषविभ्रमाभि:रटन्मृगेषु नटच्छिखण्डिषु स्फुटन्नीपेषु रटन्निर्झरेषु वर्षजलधाराधौतरत्नोपलतलेषु क्रीडापर्वतेषु विजहार ॥

धाराखद्विगुणबृंहितमदरागं च वार्षिकं . . . . वल्लीगुल्मगुलुच्छकच्छन्नमार्गेषु कृष्णागरुसारधूपसंचारोद्गेषु च मणिदरीगृहेषु मत्तरामाद्वितीयोरेमे । मण्डपचतुरश्रयातासु चावर्तवतीषु चरणमण्डपगर्भवापिकासु कदुष्णवारिपूरितासु . . . . (16 a) शतावतंसितासु घर्म इव लीलयागन्धगजगामिनीभि: समं समक्रीडत ॥

निविडितासु च निशीथिनीषु मन्मथमथितधृतीनां दुर्दिनाभिसारिकाणामासारजलापराधक्लिष्टनैपथ्येषु गात्रेष्वादरप्र . . . . यमानमण्डनस्तासां च स्वजनवञ्चनापदेशकौशलेषु श्रूयमाणेषु संहर्षेणावसन्नकृतकलीलानीलांशुकावगुण्ठनस्यान्धकारराशेरुपाक्रियायामुपन्यस्त-यामात्मनि पुरुषाभिमानमारोपयन् कचिद्भवनभित्तिस्पर्शपरम्परोन्नीतपद्धतौ कचित्तरलसौदामिनीदाम दर्शितपुरुषो भागे कचिन्नागरिकपटहशब्दगम्भीरगर्जितमुहूर्तमात्रविह्वलावस्थाने कचित्प्रातिरोधकानामिवाम्बरग्राहिणां प्रथमाभ्राणामविरलशरवर्षासारसंभ्रमाश्लिष्टमन्दिराङ्गणमार्गपादपस्कन्धे प्रसङ्गोदीरितरागाभिसरण साहसे सानुकम्पप्रमदामापद्यमान: स्वतिशयोपचार . . . . सान्त्वनमहत्त्वरसमनेकधा सुरतलास्यमत्युदारतरलितविभ्रमं बबन्ध ॥

बन्धागारगर्भादिवाभ्रपञ्जरान्निर्गच्छति पुनरुष्मा . . . . वनैरन्तर्गतैरापतप्रभग्न इव ध्वस्ते मेघवने चिरनिरोधसम्पीडितखधामामर्षितार्तकरप्रतीकोष्विव प्रक्षीणवारेषु वारिधरमहाह्रदोदरेषु . . . . मोद्घोषणविराममूकेषु स्तोकिकेषु गलितपतयो धरांशुकासु लज्जयेव कापि लीनासु ह्रादिनीषूदधिमहावलाहकाचूषित वर्षवारिपूरस्यान्तरिक्षसरसो

मरकतकुटीष्विव स्फुटीभवन्तीषु नीलकण्ठकण्ठमेचकासु दिक्षु शुकासी-रशासमनकलत्वर्गेषु क्षीर्णेषु शिखिबर्हेषु प्रतिबद्ध मुकुन्दलोचनारविन्द-वारिजवारिश्रमयेष्विव प्रवृत्तोष्वितस्ततो विजृंभितमम्भोरुहवनेषु पन्न-गेभ्य इव निर्विषेभ्यः पयोदेभ्यो विहाय भयमतिपतत्सु रात्रिं दिवम-ध्वनोऽध्वनीनेषु सकलाब्दकलुषितासु बहुमुखा सारवातोवि . . . द-त्स्वयमेव क्रमादुपागतप्रसादसुचिरक्षोभानुबन्धलज्जयेव मन्दमन्दं वरु-णालयमुपसर्पन्तीषु प्रतनीयसीषु फेनमालिनीषु मधुपोन्मादवन्नवने मद-गन्धविदग्धविशारदे शारदे विदारयति मनांसि मानवतामनङ्गवारणा-नीके सप्तपर्णवने कुसुमधव . . . . कुसुमशरशरावलीष्व विरहितज-नहृदयदारिणीषु समन्ततः पतन्तीषु हंसमालासु वसुधाविभ्रमहेमचूर्णै-रसनरेणुभिरभिनवमनसिजातुराखिन्नसुभगासु वनस्थलीषु बाणमालि-नीरिषुधिरिव मनोभुवो भुवः परिहरत्सु समाधिच्छेदशंखिषु स्वमुखा-नेकवारोदीरितमधुरशात्कृतिग्राहिणीनां शुकश्रेणीनामचकितमुक्तमंजुल-प्रतिशारशासितास्वनुमन्यमानकलमकणिशभङ्गासु कलमगोपिकासु स-कलकामुकानीकोत्कम्पकारिणीं खड्गधारामिव श्यामावलम्बमाने द्वि-गुणतेजसि ज्योतिषामधीशे शान्तगर्जितानि शशाङ्कपादच्छायश्रयीणि शल्मलीतूलपरिलघूनि मेघकुलानि विलोक्य दर्पादिव मत्तमधुकरीमधु-रध्वानगर्भं हसन्तीषु कुमुदिनीषु विशदायां शरदि शारदशशिकरसित-चन्दनधवळहिमजलबिन्दुशीकरशीतळासु श्लथमानशिशिरशोफालिको-पहारहासिनीषु हर्म्यमालासु मधुभाषिणीमधूनि माधवानुभावः पूर्णे-ष्वपि मनोमणिचषकेषु स्वकरतलोपधानच्छायोपरक्तारिक्ता इति मुग्ध-युवतयः ॥

क्षणमन्नीहमाना: पातुमस्थुः । प्रहसता पुनः प्रियेणावार्यन्त-मत्तमत्तकाशिनीवक्त्रांबुजचुम्बनाशये वासवतरङ्गमालासु च्छायामयः मपात । ........ (17 a) सः सुहमधुना सुवदनाभिपीत इव प्रति-

माशशीस्युन्मदानां तासां सहृदरिव स्वालापदेशव्यलमनेकाव्यः तथा स्नि-
ग्धाः सन्तोऽपि पश्यन्त एव ताराप्तेरस्मनि संक्रामन्ति तत्कृतारक्तार-
......चाचक्षिरे मृगाक्षीणां प्रक्षरितस्वेदबिन्दवो मुखेन्दवः । कस्य
वा श्रीनिमित्तं न हि विद्यन्ते प्रीतया सोऽपि सोमसा इवामुखराभि-
पत्य तत्रैव संममज्जुः नत्वशकप्र याहर्तुं सतैरपि तारा........कान्तिम-
न्थरैरर्यलम्बतनितम्बनीनां वदनपङ्कजैः कुमुदवान्भव: । फलितं हि
गुरुतल्पगस्य तस्मिन्नेव देहे पातकमर्हति । मकर।राभवद्दर्शनप्रविष्टा
इवान्धकाराकृतयो ननृतुर्नतभ्रुवां भ्रुवः । सुधीरोऽपि रिपुव्यसने
हर्षाद्विक्रियेत किमुत निसर्गचपलाः । कपोलसंक्रान्तचन्द्रश्चन्द्रोदय-
इवोन्मदाना मुन्मीलितकुमुदकाननोप.... ....रानतामाविरासीत् । अ-
मृतसम्मितस्मितोद्गमो मदिरातरङ्गभङ्गुराङ्गं मृगाङ्क........ चक्के दूरा-
ममसहचराधियः कृपणबन्धदृष्टिषु करुणमारसन्तीषु भ्रमरकामिनीषु
कलगिरोऽपि मदकलास्तथवाग्वशोचया......प्रियप्रबाध्यमानाश्च या-
थार्थ्यज्ञानायोगात् योगितकुरङ्गलाञ्छनास्तमपि प्रबुद्धबन्धुजीववनवि-
लम्बिना स्वलोचनप्रभासञ्चयेन संछाद्य तत्वाण्यदृश्य...ककक्कोभंगुरि-
ताक्षीभुवो वञ्चकास्मान् वञ्चयम इति कर्णकुवलयै कान्तमंसयोरता-
डयन् ॥

असावपि प्रियतमोपहृताननवनजवारुणिगण्डूषपानरक्तगण्डो
गण्डलग्नरजतपुण्डरीकमिव कर्णचामरविभ्रमं प्रतिबिम्बमृगाङ्कममलं द-
धानं चन्दनधवळमूर्तिरिन्द्रवारण इव मन्दाकिनीपयसि चन्द्रिकाजालके
विजहार हरिणधरकरपुटावसिच्यमानामृतलवापनीयमानखेदश्च राजपे-
शलातिशिञ्जानवलयमंजुमञ्जरिकाक्षीगुणानि गजेदङ्कजानिव भ्रान्तिम-
न्तिभंगुरितमाद......बलिप्तानि कुवलयवनानि मुद्रन्, दारुणशरदा-
तपव्राणि (17 b) कज्जलीकृतानि घनकुलानि तुहिनशीकरठगजादि-
वाकिरन्, हिमकरगृह्ययेव सर्वौषधीषु गौरवमारोपयन्, नीहारद्रो-

हृदिव नित्योपगूढपावकान् वनस्पतीं क्लिश्यन्, निजरिपुवारिजन्तव-धेनरुषेव जलान्युद्धापयन्, सपक्षानुजिघृक्षयेव निसर्गशीतलानि मौक्तिकाभरणानि विभ्रमयन्, अखिलजीवलोकतत्कुलता षण्डफलभराकाण्डलुण्ठाकडामरीकदमनदीक्षित इव पतिमण्डलानि सङ्कोचयन्, सकलत्रिभुवनरसहठोपहारपराभवदुर्विकत्थनतस्करामिव भास्करं निरुन्धन्, दीविनत (?) वाल्लभ्य वर्द्धितानि दिनविदाहवि फूर्जितानि वर्तयन, निगृहीत सर्वसत्त्वस्वच्छन्दपर्यन्तम्..... ...प्रायसर्वारम्भो व्यजृम्भत स्वभावशीतलो हेमन्तसमयः ॥

तस्मिन्नपि समये दलितहिमजालिमद्भिरनलज्वालाकबलितमलयजैधसानायसीना हसन्तिकानां सहस्रैः स सन्निहितविलासिनीयौवन-....हावाहितनिदाघेष्विव महत्सु मन्दिराभ्यन्तरेषु तुहिनपटलातिभारनभयनिलीननभस्थलास्वि वानवरतदह्यमान कृष्णगरुबहळधूमदुर्दिनान्धकारासु मलिनदिगङ्गनामुखविलोकनाकुलतयेव गाढविवृतगवाक्षेक्षणासु प्रासादपंक्तिषु गन्धतैलावसेकसुरभिगान्धिभिः करतलकलिताभि र्दीपिकाभिः लोकसङ्कोचकृतो हेमन्तरजनीरिवानिच्छता परिजनेन परिवृतो यथर्तुवेषः समाहिष्या महार्हं शयनमारुरोह ॥

तस्मिंश्च रक्तनीलधवलकान्तिना नियतमेक्षणप्रभासञ्चयेन चित्रकञ्चकेनेव छाद्यमानो हृदयविजृम्भमाणमन्मथहुताशनोद्वे . . . . तल्पेन तत्कालोचितेन कुंकुमाङ्गरागेणेव रागेणाधरपल्लवस्यानुलिप्यमानः कर्णकथनीयमन्मथगुह्याख्यानेषु कुन्दकलिकाभिरिव स्मितमयूखमञ्जरीभिः क्रियमाणावतंस. क्ष . . . . (18 a) बाह्यप्रणयकथाभिरुपपादितरतोत्सवोपकरणासु निर्गतासु परिजनवधूषु मधुरचुम्बनोपक्रमवृद्धरागावेशो विवशस्फुटपातितदशनपद्धति . . . . तवेदन . . . . मुखग्रहणविग्रहोपयुज्यमानाशिखरनखरलीलायुधो सललितविसंवादनिर्गमप्रतिबद्धरुद्धनीविकांशुकपरिपन्थिकोपलीलाकुञ्चितभ्रुक . . . .

लधम्मिल्लबन्धसन्धुक्षितमन्मथातिसंभ्रान्तान्तरितविरोधनपयोधराविः-गाढो गुरुनितम्बसंमर्दवर्धिताक . . . . . . . पीडिताकम्प्रमध्यच्छिद-ष्टाधरसंभ्रमभ्रान्तमुग्धलोचनमाञ्चितकररुहलिख्यमानकपोलविह्वलान-नव्यंजितस्तानित . . . . . . . . . लभङ्गपारिप्लवस्वेदबिन्दुरेख-मुद्दामरागदीयमानयुवतिपौरुषमुपोढलक्तकपादपालीरक्तभंगुरतरङ्गो-त्तर . . . . . . . . . छुरितगर्भगृहतलनलकवासचूर्णविसरधूसरि-तोपधानमग्राम्यविकल्पविभ्रमरमणीयमायतायतं सुरतमाच . . . . . शत्येशैत्यशान्तशकुन्तकान्ता मुक्तकोटरशते शीतालुजगत्प्रतीक्ष्यमध्य-न्दिनातपे तापसतपस्संभारभावनार्चिते. . . . . .पालनज्वलितपुण्यानल-नसकलसहे (?) सुभगभासुरहसन्तिकासहस्रे सहस्ररश्मिश्रितशीतघृ-णिशीले श्लघनीयपक्ष्माणि मृगरोमणि मणिदामावहेलहे. . . . . . शुजन्म-नि मन्मथवकुलवृन्दानान्दिकुञ्जकुञ्जे पञ्जरजालकाररीपुटघननयाच्या-वाचाटहिमजडजठरे (?) पुष्करे पुष्करोद्गाजिरोध्रसम्पादिगतिधृत. . . . . .
(18 b) मृगाशिशौ शशविचया क्षप्यकुड्यके शय्यातलमुक्तशकशुकामु-कमिथुने नूतनगर्भभारमन्थरमाधवीलतेव ललितमारुताकर्षणसुकर. . . . तुमुलधूमकधूमलोषधीदुष्षहप्रदोषदुर्भगोडुपे दुर्भेदस्फटिकदलबहुतुहि-नघनघनसरहारिणशफरुके शिशिरकाले मीलयति भुवनम-ग्नि . . . . . . . . . . . . . . . . . मृदुत्राणचर्मकंचुकित-चरणपद्मो हिमसत्रासिसारितप्रमदवमप्रसादवेदिकादत्तसङ्केतमङ्गजा-तलंघित . . . . . भिन्नवः सन्धारलालसोऽभिसृत्यसुसङ्गीतपरिजना-गतप्रतीकारभूमिकेषु घटितगवाक्षावरणसंपुटेषु लीलाप . . . . का-श्रावणाय च न क्षणविहस्ताश्चानमायस्तहस्तपल्लवव्यत्राहताधारपुटवि-घटितसमरसचुम्बनारम्भरागाविवलितनुल . . . . जर्जरकठोरपा-ण्डुरेवं, असकलगलदंशुकश्रोणिबिम्बझणायमानप्रवालकाञ्चीगुणं, अ-विरलघर्मवारिवर्षदूषितवि . . . . . सनास्वादमाकम्पमानमप्रथमय-

न्त्रणोन्माथमन्थरोद्दण्डमकाण्डवलनभंगुरितरातिलयमङ्कस्तम्भितान्तरङ्गिणाविरामवृत्त .... रितकरुणमातुरकृपणकोमलालापालिघटनयापितमसनमनलसोपलभ्यमानसद्भूतनम्रचारिकासुरतसतृप्तिमन्वगच्छन् शीलप्रवल्लभावसर्पविदित .... विधानावरोध संगृहीतश्च तज्जघननिरवकाशरशनागुणानिगालितचरणः प्रणयकोपकुञ्चिताभिर्भूलताभिः आहम इव तासामासादितहृदयवेपथुररुणाशो .... (87 a) महात्मा सर्वैरेव सज्जधन्वाभिरस्माभिरभ्रैरिव गिरिरभ्यवर्षत, नरश्चकम्पत इव .... गत्य दुर्गमत्वं चात्मनो विदूरतां च क्षेमस्थास्य ग .... भूयिष्ठतां च वासरस्य सर्वमिदमाकलय्य गन्तुकामः कुमारः करेणुकेति ..... प्रस्थिता देवी बाह्यामित्यभिहितो गृहीतसारं वैदेहिकजनमभयगतं च सखी बालवृद्धं पथिकवर्गमात्मनश्च चिरतशेषं ... ... शनैः शनैः प्रातिष्ठत सार्थमर्दनस्तु माममुष्मिन्नातस्थाने महतः सारसंचयस्य रक्षाविधौ नियुज्य राजानमन्वबध्नात् । आह्लादयन्न .... काश्चिद्गुल्मानुप्रवेशं लीनान्वेषमनस्तु चक्रबन्धं बध्वा पार्श्वोपपीडं शाययन्तः, कांश्चिदसाहिष्णुतया रसेषु युध्यमान ..... कांश्चित्पशूनिव यष्ट्युपघातं कालयित्वा प्रजावरोधं स्थापयन्तः, कांश्चिदजकनाशनष्ट...... नानुपलभ्य हर्षादन्योऽयं नामग्राहमाह्वयन्तः, तथा च केचिद्गुह्यकजनकथकानि कौतुकं... स्फटिकं पाषाणशुष्कपेषं पिष्ट्वा नरास्त्रविस्रेण वक्षसि विक्षेपन्तो....................

परिस्रवशराविद्धमुपरतासु विदेहमनुचरधृतमातिप्रहृष्टया दृष्ट्या मुहुरवेक्षमाणो यात्रहन्तमे......... तेजोराशेरकस्मादेवान्धकारहतेत्युपरातिरभवादित्याशङ्कितसुहृद्विनाशोऽपि विशांपतिर्विवेश........ भाकं जाति किमिदमिति कृतापराध इव सरभसेनासमसवैतण्डिकश्चकम्प । पार्थिवस्तु परिजनफलकात्समाश्वा........ स्थितामेव मैथिल इति शबरमप्राक्षीत् । आनीतोऽसौ प्रतिहतममङ्गलमनागसस्स देवो विदेह इति

व्याधिजातिप्र........ या तदुक्तमिति श्रुत्वा चोच्छ्वसितहृदयेनोर्वीभुजा स्वयं समाश्वास्य देवीमपवार्य कलकलमस्तु करुकथाशेषमित्यादिष्ट........ तिरनादृष्टमेव तं हृतशेषं सार्थमादाय चेनैव तरसा क्षेमप्राप्तं प्रहारवर्माणमकथयदिमं च बालकं मदुपलभ्य दुहितुरस्या वि..... धूलिभिरिवावचूर्ण्यमानस्य मदङ्गस्पर्शकोलालतावलीतन्त्रितविवृत्तपृष्ठमुभयपक्षविकीर्णकुटिलकुन्तलभरप्रकटस्कन्धकरजचिह्नमधोमुखी भवत : प्रिय........ यारिष्टसनगुणकिणप्रथितनिष्ठुरप्रकोष्ठयोः प्रवेष्टदण्डयोः प्रतिपेशमर्पितवत्यसौ च, मद्गात्रस्पर्शनिर्वाणरोहद्रोमाञ्चकल्पाभ्यां परिरम्भाभ........ व स्थितास्मि । स्वस्मिन्नेव वाहने अस्मिन्नेव च क्षणे क्षणदाचरं भीमदर्शनैर्भवद्भिर्भक्षितः क्षयमगादयं सार्थः । सार्थविद्रवे चासौ........ न्तेव भ्रष्टस्य करिणः कण्ठपार्श्वे यावदेनं लम्बयति तावदस्य करक्षुरतीक्ष्णेन क्षुरप्रेणाच्छेति स भुजच्छेदे वैणलाज...., तुपुरुषयुगलमध्येन यन्त्रशैथिल्यचलसमाधिसिंधुरश्रवणपल्लपायभेरीकन्धरार्धमवगाढवानयं तोमरः परि...., युषोऽस्य गात्राण्यस्पृशन्तः पञ्जरस्थामिव राजकेसरिकिशोरकमकार्षुः । बहुमर्मक्षत....णश्च ममैष मत्समक्षं भियं भियेवास्पृशत् । बहुपराक्रम्य प्रियानसूनहासीत् । अहं च स्त्रीस्वभावसुल...., कुशलिनं कुमारं दृष्ट्वा स्वैरमेनान्परित्यजामि पापीयसः प्राणानेषते निक्षेप इति रुजापनोदिनामृतस्पर्शनेनालिङ्गनेन तिसदयमादायमत्कारदप्राणेषु तेषु—

एतावानेव भाग उपलब्धः ॥

——:०:——

# शोधनपत्रिका.

| पृ. | प. | अशुद्धम् | शुद्धम् |
|---|---|---|---|
| ९ | २२ | व्यवसिस्तपः | व्यवसितस्तपः |
| ११ | ४ | व्याजहारं | व्याजहार |
| १३ | १० | रणवत्सया | रणवद्भ्यां |
| १५ | २२ | तस्थः | तस्थुः |
| १७ | ८ | पूर्जयत् | पूजयत् |
| १८ | १४ | येऽभूत् | योऽभूत् |
| १९ | २० | कृतार्थिकृत्य | कृतार्थीकृत्य |
| २० | २४ | जाग्रसे | जग्रसे |
| २२ | ५ | शम्बर | शबर |
| २२ | ६ | अत्य.... | अस्त्यस्या....कश्चिन्मातृ |
| २२ | ७ | तलमवेत | तुलभवेत सा ( माम् ?) |
| २२ | ९ | प्रत्यधि | प्रत्यति |
| २२ | १० | प्रव्रते | प्रद्रुते |
| २२ | १३ | शाषेण | शेषेण |
| २२ | १८ | त्युक्त्वा | त्युक्ता |
| २३ | ११ | स्त्रीत्वात् | स्त्रीयात् |
| २३ | १३ | अवक्रणे | अवक्रेण |
| २३ | १५ | मारक | दारक |
| ३२ | ८ | सुगत्या | सुमत्या |
| ३४ | १ | निबध्य | निर्बध्य |

| पृ. | प | अशुद्धम् | शुद्धम् |
|---|---|---|---|
| ३४ | २ | पामरे स्महि | वामरंस्व हि |
| ३५ | १ | दत्तन्या | दत्रत्या |
| ४२ | ११ | राजेत | राजेन |
| ४२ | २१ | स्नानः—तः स्तेथ | स्नातः—तस्तेय |
| ४३ | १५ | शररि | शरीरं |
| ४५ | १० | ते | त्य |
| — | | स्थ। | रऽय: |
| ४६ | ७ | न्ताशु | न्ताश्रु |
| ४६ | १३ | देऽयैः | र्दिऽयैः |
| ५३ | १२ | प्रत्यदु | प्रत्यद्द |
| ५४ | ११ | प्रीषिते | प्रोषिते |
| ५९ | ८ | षादेषा | षा दोषा |
| ५९ | ९ | तयद | तद |
| ५९ | १२ | नक्कु | न्यक्कु |
| ५० | १७ | धारयम् | धारयन् |
| ६० | २१ | तद्ध | तद्द |
| ६१ | १७ | स्तमि | स्तस्मि |
| ६४ | ९ | शास्त्रि | भस्त्रि |
| ६५ | ६ | अक्षिपत्प्रा | अक्षिपन् पा |
| ६५ | १३ | दृष्ट्वा | दृष्टा |
| ६७ | १९ | त्मरत्वे | स्मरत्वे |
| ६२ | २१ | तारण | तोरण |
| ७उपोद्घाते | | | |
| ३ | ११ | मारमः | मारामः |
| १३ | १७ | जड्डोः | जह्नोः |
| १३ | १८ | जिहत्वा | जिह्वा |